देवीं ताण्डववामभागनिलयां ध्यायेत् सभानायकीम्।।

80. शिवकामसुन्दरी ध्यानम् (2)

शक्तिश्च द्विभुजाश्च लम्बितकरां नीलोत्पलं धारिणीम्।
श्यामाङ्गाश्च द्विनेत्रचारुवदनां त्रिभङ्गीं च चारुस्तनीम्।
नानाभूषणहेमरत्नमकुटां नीलाळकाशोभितां
देवीं ताण्डववामभागसहितां ध्यायेत् सभानायकीम्।।

81. नृत्तमूर्ति ध्यानम्

सव्यापस्मारदेहस्थितमधविलसत् वाममुद्धृत्यपादं
तस्योर्ध्वे वामपाणिं स्फुटकमलरुचिं लम्बयित्वा नटित्वा।
भस्मोद्धूलितगात्रमिन्दुविलसत् वामे उमासेवितम्
ह्यग्निं डोलकराभयं डमरुकं धृत्वा नटेशं भजे।।1।

82. कल्याणसुन्दरमूर्ति ध्यानम् (1)

सिन्दूराभं त्रिणेत्रं युगभुजसहितं हारकेयूरभूष्यं
दिव्यैर्वस्त्रैर्वृताङ्गं वरकटकलसत् हेमकल्हारभूष्यम्।
शम्भुं दक्षिणपार्वतीकरतलं सव्येन संगृह्णतं
टङ्कं कृष्णमृगं धरं चूडेन्दुबद्धं हरम्।।

83. कल्याणसुन्दरमूर्ति ध्यानम् (2) – திருவீழிமிழலை

एकास्यं द्विभुजेन्दुचूडमकुटं कात्यायनीं दक्षिणे
वामे क्षोर्ध्वशिरोर्ध्वविन्यस्य करं सव्ये तु दण्डान्वितम्।
पादाङ्गुष्ठद्वयेन अक्षिकमलं सव्ये स्थितं कुञ्चितं
रुक्ताभं वरवेषभूषणहितं श्रीतेजिनीशं भजे।।

84. कल्याणसुन्दरमूर्ति ध्यानम् (2)

कुन्दाभं तरुणेन्दुचूडमकुटं कृष्णं वरं वामके
दक्षे पदाकया गिरिसुता हस्ताम्बुजं बिभ्रतम्।
टङ्कं चोर्ध्वकरे धृतं स्वपुरतः पद्मोद्भवेनावृतं
वामे विष्णुसमाश्रितं स्मितमुखं कल्याणदेवं भजे।।

85. कल्याणसुन्दरमूर्तिशक्ति ध्यानम्

पीनोरुं पीनगण्डाञ्च पीनहस्तसमन्विताम्।
द्विबाहुकां द्विनेत्रां च सर्वाभरणभूषिताम्।।
दुकूलवसनां देवीं ध्यायेद्देवस्य वामके।।

86. भिक्षाटनमूर्ति ध्यानम् (1)

चतुर्भुजं त्रिणेत्रञ्च नग्नञ्चैव स्मिताननम्।
भस्मदिग्धं विद्रुमाभं कट्यां पन्नकसंवृतम्।।

आवृतालङ्कृतं भृङ्गी पादं पादुकसंयुतम्।
दक्षिणा तत्करागन्तु हरिणस्यानुगं भवेत्।।

दक्षिणे परहस्ते तु डमरुं चैव कारयेत्।
वामे तु वरहस्ते तु त्रिशूलं पिञ्चधारिणम्।।

कुञ्चितं दक्षिणं पादं वामपादं तु सुस्थितम्।
समभङ्गस्थानकञ्चगनोन्मुखरूपकम्।।
कपालोपेतहस्तञ्च वृषाणापिसमं भवेत्।।

87. भिक्षाटनमूर्ति ध्यानम् (2)

सारङ्गास्ये तु दूर्वाङ्कुरमपिदधतं सव्यहस्तेन शूलं
कण्ठे क्षिप्त्वाऽपरेणाकलितकनेतन्मूलमन्यद्विहस्ते।
ब्रिभ्राणं स्यात्कपालं डमरुकममलं पादुकासक्तपादं
नग्नं स्त्रीमोहकाङ्गं प्रमथगणयुतं नौमि भिक्षाटनेशं भजे।।

88. भिक्षाटनमूर्ति ध्यानम्

शुक्लाभं शुभलोचनं डमरुकं दूर्वाङ्कुरं दक्षिणे
वामे शूलकपालसंयुतकरं सत्पादुकं पादयोः।
लम्बत्पिङ्गजटाधरं शशिधरं दक्षे मृगं वामके
भिक्षापात्रधरं च कुण्डपिठरं भिक्षाटनेशं भजे।।

89. कामदहनमूर्ति ध्यानम्

उग्ररूपं तु कामारिं चतुर्भुजसमन्वितम्।
कृष्णटङ्कसमायुक्तमभयं वरदान्वितम्।।
कामनिग्रहरूपन्तु पद्मपीठोपरिस्थितम्।
दक्षिणे लम्बितं पादं वामपादं तु शायिनम्।।
कार्यःकामरिपुं देवं वक्ष्येऽहं कालनाशनम्।।

90. कालकालमूर्ति ध्यानम् (कालान्तकः) (1)

नीलाभं रक्तनेत्रं ज्वलितकचयुतं क्रूरदंष्ट्रं सुभीमं
शूलं बाणं च खड्गं परशुमपिधनुः खेटकं पाशमीढ्यम्।
शुचिहस्तं च सम्यक परकरनिराभ्यां ब्रिभ्रतं कालकण्ठं
ताड्यत्कालाङ्घ्रिपद्मं मुनिमृतिहरकं कालकालं नमामि।।

91. कालकालमूर्ति ध्यानम् (कालसंहारः) (2)

बन्धूकाभं त्रिनेत्रं युगभुजसहितं शूलमुद्धृत्यहस्ते
सव्ये टङ्कं सुदंष्ट्रं दधतमपरतस्तर्जनी सूचिपाशम्।
आकिञ्चत्कुञ्चिताङ्घ्रिं निजपदकमलं वाममुद्धृत्यकालं
विध्वंसं तं सुरेशं क्षितिमुनिवरदं भावयेत्कालकालम्।।

92. त्रिपुरारिमूर्ति ध्यानम्

चतुर्भुजं त्रिणेत्रं च मृगं परशुधारिणम्।
धनुर्बाणसमायुक्तं उमयासहितं तथा।।
पत्रं दधन्वामकर्णे दक्षिणे कुण्डलान्वितम्।
उपवीतसमायुक्तं समभङ्ग्युतं शिवम्।।
जटामकुटसंयुक्तं विलसत् विद्रुमाङ्गतम्।।

93. त्रिपुरसंहारमूर्ति ध्यानम्

रक्ताभं मणिपूर्णचन्द्रवदनं कृष्णं मृगं कार्मुखम्।
वामे सव्यकरे शरं च दधतं टङ्कं च देव्यायुतम्।।
गङ्गाचन्द्रकलाधरं हरिविरिञ्चाद्यैस्सदा सेवितं
हासैर्दग्धपुरत्रयं त्रिभुवनाधीशं पुरारिं भजे।।

94. जलन्धरहरमूर्ति ध्यानम्

रक्ताभं उग्रनयनं द्विभुजं च त्रिनेत्रकम्।
उपवीतसमायुक्तं सर्वालङ्कारशोभितम्।।
पादयोः पादुकायुक्तं किञ्चिद्वैकमनोन्मुखम्।
दक्षहस्ते स्थितं छत्रं वामे पूर्णकमण्डलुम्।।
सुविकीर्णजटाभारं गङ्गाचन्द्रसमन्वितम्।
कर्णकुण्डलसंयुक्तं हारनूपुरसंयुतम्।।

95. गजारिमूर्ति ध्यानम् (1)

स्थित्वा हस्तिशिरस्थ दक्षचरणं वामाङ्गदक्षोधृतं
पुच्छोर्ध्वावृत चर्ममुद्धृतकरं शूलासि शृङ्गोज्वलम्।

टङ्कं कृष्णमृगं धरवरकरे भीष्माननेन्दु प्रभं
वामो मातिभयोन्मुखी सुतयुतं सूर्याढ्यहस्तं हरम्।।

96. गजारिमूर्ति ध्यानम् (2)

त्र्यक्षं शान्तं प्रसन्नं शशिधरमकुटं कुण्डलोद्भासिकर्णं
हस्तैः कपालं त्रिशिखदहनसर्पाङ्कुशं चापहन्तम्।
बालाकारं सुवेषं तरुणरविनिभं शीघ्रमुद्भिन्नहस्ति
क्रोडामध्यस्थ हस्तद्वतयमतभजे चाष्टहस्तं गजारिम्।।

97. वीरभद्रमूर्ति ध्यानम् (1)

चतुर्भुजं त्रिणेत्रं च जटामकुटसंयुतम्।
दक्षिणे खड्गबाणौ च वामे चापं गदाधरम्।
दंष्ट्राकराळवदनं भीमं भैरवगर्जितम्।
भद्रकाळीसमायुक्तं कराळं हृदि भावये।।

98. वीरभद्रमूर्ति ध्यानम् (2)

मरकतमणिनीलं किङ्किणीयुक्तपादं प्रकटितमुखमीशं भानुसोमाग्निनेत्रम्।
हरिहरमणिखेटं त्र्यक्षमाग्रहस्तं विधिधरमहिभूषं वीरभद्रं नमामि।।

99. वीरभद्र ध्यानम् (3)

नीलाभं रक्तवस्त्रं भ्रकुटियुतमुखं ज्वालकेशं त्रिनेत्रं
सव्ये खड्गं च दण्डं त्रिशिखपरशुं वामभागे कपालम्।
खेटं घण्टां वहन्तं मुसलमपि दधत्किङ्किणीमालयाढ्यं
सिंहत्वकृतशक्ति स्फुरतु मम पुरो वीरभद्रस्वरूपम्।।

100. हरिहरमूर्ति ध्यानम्

सव्याङ्गे विद्रुमाभं शशिधरमकुटं भस्मरुद्राक्षभूषम्
वामाङ्गे श्यामलाभं मणिमकुटयुतं पीतवस्त्रादिशोभम्।
सव्ये टङ्काभयं स्यादितरकरयुगे शङ्खकौमोदकी स्यात्
किञ्चिल्ललाटनेत्रं विलसत्पुरतः श्रीर्हरिरर्धदेहम्॥

101. अर्धनारीश्वरमूर्ति ध्यानम् (1)

चतुर्भुजं त्रिणेत्रं च शिवांशं दक्षपार्श्वके।
वामार्धं वामभागे तु सीमन्ततिलकालकम्॥

नेत्रार्धन्तु ललाटे तु संयुक्तं दक्षिणांशके ।
दक्षिणे कुण्डलं कर्णे धरं वामे तु पत्रकम्॥

कट्यां वा कलितं वामे केयूरकटकान्वितम्।
उमांशे तु स्तनं कुर्यात् स्वाहाकारयुतं तु वा॥

श्रोण्यर्धं दक्षिणे शम्भोर्व्याघ्रचर्मकृताम्बरम्।
उमार्धं कटिसूत्रं तु चित्रवस्त्रपरिच्छदम्॥

नूपुरालङ्कृतं वामे सव्यपादं तु कुञ्चितम्।
स्वयं प्रवाळवर्णं स्यात् सुकृष्णं वामभागकम्॥

102. अर्धनारीश्वरमूर्ति ध्यानम् (2)

धम्मिल्लं तिलकोज्ज्वलं गळतटे सूत्रं च माङ्गल्यकम्।
ताटङ्कं कुचमण्डलं त्रिवळिकं बाणौ लसत्कङ्कणम्॥
काञ्चीदामधरार्धमध्यवलयं सौवर्णचित्राम्बरम्।
सिञ्जन्नूपुरमेकपादकमलं ध्यायेत् महस्साम्बकम्॥

103. अर्धनारीश्वरमूर्ति ध्यानम् (3)

परशुमभयसव्ये चोत्पलं चोरुहस्तं किरीटमकुटचूडं श्यामळं शुक्लवर्णम्।
भुजगकमलमालारक्तवस्त्रं च चर्मं धवळवृषभरूढम् अर्धनारीशरूपम्।।

104. अर्धनारीश्वरमूर्ति ध्यानम् (4)

पुंस्त्रीरूपधरं तनौ शशिजटा टङ्कारुणाभं फणिं
व्याघ्रत्वक्कसनं प्रकोष्ठवृषभं वक्राङ्घ्रिकं दक्षिणे।
वामे श्यामवरोत्पलदलकुश क्षौमर्जुपादाम्बुजं
विभ्राजत् हेमविभूषणादिरुचिरं वन्देऽर्धनारीश्वरम्।।

105. किरातमूर्ति ध्यानम् (1)

चतुर्भुजं त्रिणेत्रं च जटामकुटसंयुतम्।
सर्वाभरणसंयुक्तं दिव्याम्बरसमावृतम्।।
धनुर्बाणयुतं रक्तं कृष्णं परशुसंयुतम्।
उपवीतसमायुक्तं समभङ्गतनुं भजे।।

106. किरातमूर्ति ध्यानम् (2)

रक्ताङ्गं द्विभुजं तथा शरधृतं मुक्ताळकं सुस्थितम्।
उग्राक्षद्वयसंयुतं विपुलसत्वक्षस्थ विस्तीर्णकम्।
महनीयपुष्पसंकीर्णभूषणधरं शार्दूल चर्माम्बरं
बद्धौ पादविराजितो धनलसत् ध्यायेत् किरातं परम्।।

107. कङ्काळमूर्तिः

भस्मालेप त्रिपुण्ड्रं रुचिरमणिलसत् पिञ्चकङ्काळदक्षं
टङ्कं वामे कराब्जैः दधतमपिलसत्सान्द्रसिन्दूरशोभम्।

शूलं कृष्णमृगास्य लम्बितकरं बद्धेन्दुचूडं हरं
वन्दे देवऋषीश्वरैः परिवृतं वैयाग्रचर्माम्बरम्।।

108. चण्डेशानुग्रहमूर्तिस्वामि ध्यानम्

चण्डेशं पीतवर्णं युगकरसहितं दक्षहस्ते च टङ्कं
वामे कृष्णं दधानं वरकरसहितं पार्वतीवामभागम्।
चण्डेशस्योत्तमाङ्गे प्रतिनिहितकरं दक्षभागे त्रिणेत्रं
सर्वालङ्कारयुक्तं शशिकलधरं गङ्गयायुक्तमीडे।।

109. विषापहरणमूर्तिस्वामि ध्यानम्

एकवक्त्रं त्रिनयनं जटामकुटसंयुतम्।
चतुर्बाहुं सुरत्नञ्च मृगं परशुधारिणम्।।
दक्षहस्ते गरं धृत्वा पानोन्मुखमदेक्षणम्।
वरदं वामहस्ते तु सर्वालङ्कारसंयुतम्।।
देवस्य वामपार्श्वे तु देवीञ्चैव तु भावयेत्।।

110. चक्रप्रदानमूर्तिस्वामि ध्यानम् (1)

शान्तं त्र्यक्षं युगभुजसहितं देव्यायुतं वामके
टङ्कं कृष्णमृगं वरञ्च दधतं सव्येन चक्रप्रदम्।
सव्ये लम्बितपदं सुनिद्रितपदं वामे तु पद्मेसमं
पादे विष्णुदृगर्चितं विधियुतं चक्रप्रदं भावये।।

111. चक्रप्रदानमूर्तिस्वामि ध्यानम् (2)

विष्णुस्त्वीशपुरस्थितोञ्जलिकरः देवस्य पादाब्जयोः
संस्थाप्याक्षिलसत् सहस्रकमलं संप्राप्तवानीश्वरात्।

यस्माच्छक्रमथोवरं पशुपतिं पद्माक्षळत्याख्यया
टङ्कं कृष्णमृगं वरं परकरात् चक्रप्रदं तं भजे।।

112. विघ्नप्रसादमूर्तिस्वामि ध्यानम्

टङ्कं कृष्णमृगं दधानममलं प्रालम्ब्य सव्याङ्घ्रिकं
वामे निद्रितपादमिन्दुसदृशं त्र्यक्षं जटाशेखरम्।
वामाङ्गे कृतविघ्नराजमिदरं तन्मूर्ध्निविन्यस्य तत्
प्रीत्यानुग्रहं त्रिपुण्ड्रधरणं विघ्नःप्रसादं भजे।।

113. सोमास्कन्दमूर्तिस्वामि ध्यानम्

उद्यद्भानुनिभं चतुष्करयुतं केयूरहारादिभिः
दिव्यं वस्त्रधरं जटामकुटितं संशोभनेत्रत्रयम्।
वामे गौरियुतं सुखस्थमुभयोर्मध्ये कुमारस्थितं
सोमास्कन्दविभुं मृगाभयवरान् टङ्कं दधानं भजे।।

114. सोमास्कन्दमूर्ति ध्यानम्

दक्षालम्बितवामनिद्रितपदं कृष्णं मृगं चाभयं
टङ्कं चादधतं वरं च कटकं बिभ्राणकं वामके।
वामे लम्बितनिद्रितान्यपदया देव्यायुतं मध्यतः
स्कन्देनाब्जकरद्वयेन सहितं सोमागुहेशं भजे।।

115. स्कन्दमूर्तिस्वामि ध्यानम्

बालरूपस्थितं स्कन्दं द्विनेत्रं द्विभुजान्वितम्।
सरलाब्जधरं हस्ते सर्वाभरणभूषितम्

116. एकपादमूर्ति ध्यनम्

ध्यायेत्कोटिरविप्रभं शीतांशु गङ्गाधरं
हस्ते टङ्कमृगौ वराभयकरौ पादैकयुक्तं विभुम्।
शम्भोर्दक्षिणवामकक्षभुजयोः ब्रह्माच्युताभ्यां स्थितं
तत्तल्लक्षणमायुतैः परिवृतं हस्तद्वयाढ्याञ्जलिम्।।

117. सुखासीनमूर्तिस्वामि ध्यानम्

शान्तं श्वेतं त्रिणेत्रं रसभुजसहितं कुण्डलोल्लासिकर्णं
दण्डं घण्टां कुरङ्गं परशुफणधराभीतिकान् दक्षवामैः।
बिभ्राणं वामपादं शयितपरपदं लम्बिभूतस्थपादं
वामे गौर्यासमेतं शशिधरमकुटं तं सुखासीनमीडे।।

118. दक्षिणामूर्तिस्वामि ध्यानम् (1)

पादेनाक्रम्यभूतं तदुपरिगुणितं पादमेकं निधाय
व्याकुर्वन् सर्वशब्दान्निजकटकमयी भागभाजामृषीणाम्।
व्याळं व्याख्यानमुद्रां हुतवहकलिकां पुस्तकोहस्तपद्मैः
नित्यं बिभ्रत्त्वचतुर्भिः स्फुरतु मम पुरो दक्षिणामूर्तिरीशः।।

119. दक्षिणामूर्तिस्वामि ध्यानम् (2)

पर्वतमुपरि शृङ्गे शम्भुयोगासनस्थं
धवळभसितवर्णं वस्त्रयज्ञोपवीतम्।
करतलवह्निसर्पं पुस्तकं ज्ञानमुद्रां
मुनिगणमुपसेव्यं दक्षिणामूर्तिमीडे।।

120. दक्षिणामूर्तिस्वामि ध्यानम् (3)

स्फटिकसदृशवर्णं मौक्तिकीमक्षमालाम्
अमृतकलशहस्तं ज्ञानमुद्रां कराग्रैः
दधतमुरगहस्तं चन्द्रचूडं त्रिनेत्रं
प्रणमतगुरुमूर्तिं दक्षिणामूर्तिमीडे।।

121. वीणादक्षिणामूर्तिस्वामि ध्यानम्

धवळरुचिरगात्रं सर्पराजोपवीतं
त्वनलसहितहस्तं ह्यक्षमाला करोग्रम्।
स्फुरितकनकवीणां कुञ्चितं फालनेत्रं
गिरिवरशिखरस्थं दक्षिणामूर्तिमीडे।।

122. मेधा दक्षिणामूर्तिस्वामि ध्यानम् (1)

मुद्रापुस्तकवह्निनागविलसत् पाणिं प्रसन्नाननं
मुक्ताहारविभूषितं शशिकला भास्वत् किरीटोज्वलम्।
अज्ञानापहमादिमागमगिरामर्थं भवानीपतिं
न्यग्रोधान्तरवासिनं परगुरुं ध्यायेदभीष्टप्रदम्।।

123. मेधादक्षिणामूर्ति ध्यानम् (2)

भस्मव्यापाण्डराङ्गः शशिकलधरो ज्ञानमुद्राक्षमाला
वीणापुस्तकैर्वीराजत् करकमलधरो योगपट्टाभिरामः।
व्याख्यापीठे निषण्णः सकलमुनिवरैः सेव्यमानाङ्घ्रियुग्मः
सव्याळःकृत्तिवासाः सततमवतु नो दक्षिणामूर्तिरीशः।।

124. मेधादक्षिणामूर्ति ध्यानम् (3)

अभयवरदहस्तं ह्यक्षमालां च नागं
परशुहरिणहस्तं वामपादस्थजानुम्।
नळिनवदनमूर्तिं पर्वताग्रे निषण्णं
ऋषिगणमुनिसेव्यं दक्षिणामूर्तिदेवम्॥

125. योगदक्षिणामूर्तिस्वामि ध्यानम् (1)

कैलासाद्रिनिभं शशाङ्कधवळं स्फूर्जज्जटामण्डितं
नासालोकनतत्परं त्रिनयनं वीरासने संस्थितम्।
मुद्राटङ्कुरङ्गजानुविलसत्पाणिं प्रसन्नाननं
कट्यासक्तभुजङ्गमं मुनिवरं योगं गुरुं भावये॥

126. योगदक्षिणामूर्तिस्वामि ध्यानम् (2)

मुद्रां भद्रार्थधात्रीं सपरशुहरिणं बाहुभिः बाहुमेकं
जान्वासक्तं दधानं भुजगवरसमाबद्धकक्षोवटाधः।
आसीनं चन्द्रखण्डप्रतिघटितजटा क्षीरगौरं त्रिणेत्रं
द्यादार्यैश्शुकाद्यैर्मुनिभिः परिवृतो भावशुद्धिं भवो नः॥

127. सशक्ति योगदक्षिणामूर्तिस्वामि ध्यानम् (3)

आलिङ्गेन करेण पुस्तकयुतं कुम्भासुधापूरितं
मुद्राज्ञानमनेकमालाविधिरुद्राक्षमालाकरम्।
वामोरूपरिसंस्थितां गिरिसुतामन्योन्यमालिङ्ग्यतां
श्यामामुत्पलधारिणीं शशिनिभां गौरीं स्वशक्तिं भजे॥

128. योगदक्षिणामूर्तिस्वामि ध्यानम् (4)

चिन्मुद्रामक्षमालां परशुमपिकरैः सव्यवामे वहन्तं
वामे भागे च जानूपरिनिहितकरं योगपट्टावृताङ्गम्।
सव्ये लम्ब्यङ्घ्रिपद्मं सनकमुनियुतं भूतपृष्ठस्थपादं
शान्तं त्र्यक्षं प्रसन्नं गिरिवरसहितं दक्षिणामूर्तिदेवम्।।

129. आसीनदक्षिणामूर्ति ध्यानम्

शुक्लाभं त्रिणेत्रं युगभुजसहितं दक्षिणे टङ्कपाणौ
वामे कृष्णमृगं धनुश्च दधतं व्याघ्राजिनालङ्कृतम्।
व्याख्यापीठे निषण्णं मणिमकुटजटं नागयज्ञोपवीतं
ध्यायेदिष्टार्थसिद्ध्यै जितपुरमदनं दक्षिणामूर्तिमीडे।।

130. लिङ्गोद्भवमूर्ति ध्यानम्

देवं गर्भगृहस्य मानकलिते लिङ्गे जटाशेखरं
कट्यासक्तकरं परैश्च दधतं कृष्णं मृगं चाभयम्।
सव्ये टङ्कममेयपादमकुटं ब्रह्माच्युताभ्यां युतं
ऊर्ध्वाधस्थित हंसकोलममलं लिङ्गोद्भवं भावये।।

131. मुखलिङ्गमूर्ति ध्यानम्

लिङ्गे दिक्षु चतुर्मुखं तदुपरि स्फीताननं निर्मलं
पक्षाक्षं शशधृक् जटामकुटयुक् गङ्गाधरं पाण्डरम्।
पञ्चस्कन्दसमन्वितं कनकभं कृष्णं सितं रक्तभं
श्वेतस्सर्वमुखादिषु स्फुटमलं तच्चक्रलिङ्गं भजे।।

132. शिवलिङ्ग ध्यानम् (2)

क्षित्यादिकुटिलाप्रान्तमन्त्रसिंहासनस्थितम्।
शुद्धस्फटिकसंकाशं द्वात्रिंशल्लक्षणान्वितम्।।
पद्मासनस्थं पञ्चास्यं प्रतिवक्त्रं त्रिलोचनम्।
दृक्क्रियेच्छा विशालाक्षं ज्ञानचन्द्रकलान्वितम्।।
धवलेशानवदनं पीतं तत्पुरुषाननम्।
कृष्णाघोरमुखोपेतं रक्ताभोक्तरवक्त्रकम्।।
सुश्वेतं पश्चिमास्यैकं सद्योजातं समूर्तिनम्।
नागोपवीतिनं शान्तं जटाखण्डेन्दु मण्डितम्।।
दिव्यगन्धानुलिप्ताङ्गं दिव्यमालाविभूषितम्।
शक्त्यसीशूलखड्वाङ्ग वरव्यग्रकराम्बुजम्।।
दक्षिणे चाथ वामे तु डमरुं बीजपूरकम्।
नागाक्षसूत्रनीलाब्जं बिभ्राणं पञ्चभिः करैः।।
हारकङ्कणकेयूरैः मुद्रिताभिरलङ्कृतम्।
सञ्चिन्त्यमूर्तेरुपरि शक्तिमात्रं विजृम्भनम्।।
लिङ्गाकारोपमर्देन भावने लिङ्गतां त्यजेत्।।

133. शिव ध्यानम्

नित्यं निर्मलतेजसं निरुपमं निष्कारणं निष्कळम्।
निर्वाहं निरुपाधिकं निरुपमं निर्वासिसं निर्गुणम्।
निर्वाचं निरहङ्कृतिं निरतरं निर्मत्सलं निर्मलम्।
निर्भेदादिभमं निरञ्जनपदं नित्यं शिवं भावयेत्।।

134. विष्वक्सेन ध्यानम्

विष्वक्सेनम् महाकायं अमयं च गदाधरम् ।
वामोर्ध्व करे शरंव दक्षोर्ध्वे चक्र धारिणम् ।
गजाननं शुक्लवर्णमं च सिद्धिबुध्धि प्रदायकम् ।
सर्वविध्न हरं देवं पद्मासन सुसंस्तितम् ।।

135. सदाशिव ध्यानम् (1)

पञ्चास्यं दशहस्तपक्षनयनं सव्ये भयं शूलकं
वज्रं शक्तिभुजङ्गमं च दधतं वामे वरं पाशकम्।
घण्टामङ्कुशटङ्कमर्जुनकरं पीता सिते शोणितं
श्वेतं बिभ्रतमाननं हृदि भजे सदाशिवं विग्रहम्।।

136. सदाशिवमूर्ति ध्यानम्

इन्दुनिभपञ्चमुखहस्तदशयुक्तं
शूलवरटङ्कमसिवज्रमभयं स्यात् ।
पाशवरदाङ्कुशमनिर्दहनवामे
श्वेतकमलासन सदाशिवस्वरूपम्।।

137. स्वामि ध्यानम्

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसम्।
रत्नाकल्पोज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्।
पद्मासीनं च साम्बं स्तुतममरगणैः व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिणेत्रम्।।

138. आदिचण्डमूर्ति ध्यानम्

पीताभं त्रिलोचनं शशियुतं सव्येक्षमालाधरं
सव्योर्ध्वे परशुं दधानमपरे गण्डिं त्रिशूलं परम्।
सव्ये लम्बितपदं कुणीकृतपदं वामे तु पद्मे समं
दिव्यत्कुण्डलमण्डिताननमहं नौम्यादिचण्डेश्वरम्।।

139. तेजश्चण्डमूर्ति ध्यानम्

चण्डं सुभद्राननमिन्दुचूडं शार्दूलचर्मवसनं जटिनं त्रिनेत्रम्।
टङ्कं च शूलमभयं जपमालिकां च बिभ्राणमेकमनसा सततं स्मरामि।।

140. तेजश्चण्ड ध्यानम्

चण्डं रक्तं करालास्यं अब्जाभय करद्वयम्।
दंष्ट्राकराळदीप्तास्यं जटिलं रक्तवाससम्।।

141. शिवचण्डेश्वरमूर्ति ध्यानम्

शिवाञ्जलिकृतं चण्डं शिवध्यानपरायणम्।
शिवार्चाफलदातारं शिवचण्डेश्वरं भजे।।

142. ध्वनिचण्ड ध्यानम्

युग्मकररत्ननिभ सव्यकरटङ्कं
वामकरमूरुपरिशान्तमुखमेकम्।
श्वेतमयवस्त्रयुत भस्मधरदेहं
शम्भुपदध्यानमयभक्तध्वनिचण्डम्।।

143. भोगशक्तिदेवि ध्यानम्

वामाङ्घ्रिलम्बितपदां वनजासनस्थां
दक्षाङ्घ्रिनिद्रितपदां द्विभुजां द्विनेत्राम्।
पीठे निवेशितकरां शतपत्रहस्तां
शय्याङ्गनामीश्वरवामसंस्थाम्।।

144. मीनाक्षिदेवी ध्यानम्

बालार्कारुणपद्मपीठनिलयां वामादिशक्त्यावृतां
एलागन्धिसुकुन्दळां द्विनयनां हेमाम्बरालङ्कृताम्।
वामे लम्बितदोर्लतां सुचरणां दक्षे करेन्दीवरां
श्यामाभां शरदिन्दुचारुवदनां ध्यायेत्सुमीनेक्षणाम्।।

145. स्थूलदुर्गादेवि ध्यानम्

श्यामां कोमळविग्रहां शिशिकलां शूलार्कमालाधरां
या वीणां कुशपाशहस्तविलसन्नेत्रत्रयां सुन्दरीम्।
सिंहारूढसुरक्तपात्रपिशिताम् उल्लासवेषप्रियां
स्थूलां तां विदुषीमहं दुर्गाम्बिकां भावये।।

146. मृत्युञ्जयमूर्ति ध्यानम्

चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मासने संस्थितम्
मुद्रापाशमृगाक्षसूत्रविलसत् पाणिं हिमांशुप्रभम्।
कोटीरेन्दुगळत्सुधा प्लुततनुं हारादिभूषोज्वलं
कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावयेत्।।

147. वृषभमूर्ति ध्यानम् (1)

वृषभं श्वेतरूपन्तु तीक्ष्णशृङ्गो महाबलः।
चतुष्पादो वेदरूपन्तु अग्निरूपन्तु शृङ्गकः।।
आदित्यश्चन्द्रनेत्रश्च मुखो वै रुद्र एव हि।
दन्तं नक्षत्रदेवत्यं जिह्वायान्तु सरस्वती।।
षष्टिशास्त्रश्रवळत्युन्तं रोमञ्च ऋषिरूपकम्।
वृषणे सर्वतीर्थानि मणिमालाञ्च वक्षसि।।
ब्रह्मा विष्णुश्च रुद्रश्च वृषभं रूपमुच्यते।।

148. वृषभमूर्ति ध्यानम् (2)

रजतगिरिशरीरं वेदपादं मुखोर्ध्वे
तरुणमुदितशृङ्गं चाग्निवर्णं त्रिणेत्रम्।
चलमणिगलभूषं किंकिणीदामभूषं
हरधरवररूपं चादिदेवं वृषेशम्।।

149. नन्दिकेश्वरमूर्ति ध्यानम्

बिभ्राणं परशुं मृगं करतलैरीशप्रणामाञ्जलिं
भस्मोद्धूलितपाण्डरं शशिकला गङ्गा कपर्दोज्वलम्।
पर्याय त्रिपुरान्तकं त्रिनयनं श्रेष्ठं गणैरावृतं
ब्रह्मेन्द्राच्युत पूजिताङ्घ्रियुगलं श्रीनन्दिकेशं भजे।।

150. प्रदोषताण्डवमूर्ति ध्यानम्

वाग्देवी धृतवल्लकी शतमखोवेणुं दधत्पद्मजः
तालोन्निद्रकरो रमाभगवती गेयप्रयोगाञ्चिता।

विष्णुस्सान्द्रमृदङ्गवादनपटुः देवास्समन्तान् स्थिताः
सेवन्ते तमनुप्रदोषसमये देवं मृडानीपतिम्।।

151. अधिकारनन्दिशक्ति ध्यानम्

अञ्जनप्रभामनललोचनत्रयां
कर्पूरचन्दनधरां कमलासनस्थाम्।
कस्तूरिकाकुङ्कुमपङ्कशोभां
मञ्जीरमञ्जुळपदां सुयशां भजेहम्।।

152. ब्रह्मशिरच्छेदमूर्ति ध्यानम्

नीलाभं त्रिविलोचनं शशियुतं हुङ्कारभीमाननं
भस्माङ्गं त्रिकरैस्त्रिशूलपरशुं कृष्णं मृगं बिभ्रतम्।
पादासक्तसुपादुकं विधिशिरोवामैर्हरन्तं नखै
रत्नोत्भासितकञ्चुकं विधिशिरश्चेदं सदा भावयेत्।।

153. गौरीलीलासमन्वितमूर्ति ध्यानम्

हृष्टं त्र्यक्षियुतं प्रवाळकिरणं रत्नोज्वलत्कुण्डलं
टङ्कं कृष्णमृगाभये च दधतं गौरीं निजोरुस्थिताम्।
आलिङ्ग्यस्फुटवामहस्तकमले नैतन्मुखास्वादिनं
सोद्याने गगने विमानसहितं गौरीविलासं भजे।।

154. गङ्गाधरमूर्ति ध्यानम्

शान्तं योगासनस्थं शिशिधरममलं योगपट्टावृताङ्गं
टङ्कं व्याख्या कुरङ्गं वरमपिदधतं सव्यवामे त्रिणेत्रम्।

लम्बिप्ताचूडिताङ्गं ह्यमलसुरनदीं सव्यभागे वहन्तं
गौर्या वामे समेतं भसितसिततनुं नौमि गङ्गाधरेशम्।।

155. गङ्गाविसर्जनमूर्ति ध्यानम्

पद्मस्थं शान्तरूपं स्फटिकमणिनिभं बिभ्रतं टङ्कशूले
वामे दक्षे भयाङ्कं परिविधृतजटं तत्सहस्रांशकोटेः।
भागीरथ्याविसृष्टं विदधतमपरे सद्वृषच्छत्रयुक्तं
वन्दे गङ्गाविसर्गं रुचिरगिरिजया वामभागे समेतम्।।

156. ज्वरदेवमूर्ति ध्यानम्

त्रास्यं रन्ध्रविलोचनं गुणभुजं घोरं त्रिपादं सितं
सव्ये डिन्डिमकं प्रसारितकरं वह्निञ्च वामे दधत्।
वामेस्वस्तिकमुद्धृतपदमधो विन्यस्तपादद्वयं
भस्मोद्धूलितवर्षलम्बितजटं रूपं ज्वरेशं भजे।।

157. अस्त्रदेवमूर्ति ध्यानम् (1)

त्रिणेत्रं रक्तवर्णञ्च ऊर्ध्वकेशं सुदंष्ट्रकम्।
कालञ्च शूलपद्मन्तु कमण्डल्वक्षधारिणम्।।
ऊरुहस्तं द्विपादं च किञ्चित्प्रहसिताननम्।
कोटि कोटि महाज्वालमुद्यत्कोटिरविप्रभम्।।
अस्त्रदेवं शिखाज्वालं ब्रह्मविष्णुस्वरूपकम्।
अस्त्रदेवं सदा ध्यायेत् प्रतिष्ठाद्युत्सवेषु च।।

158. अस्त्रदेवमूर्ति ध्यानम् (2)

असुरहरणशस्त्रं शूलमामण्डलाग्रं
सकलसुरभयघ्नीं शम्भुहस्तप्रियश्च।
त्रिशिखसहितवह्निमस्त्रदेवस्वरूपं
कनकरजतताम्रैर्निर्मितं लोकरक्षम् ।।

159. अस्त्रदेवमूर्ति ध्यानम् (3)

असुरहरणशस्त्रं शूलमामण्डलाग्रं
सकलसुरमयं श्रीशम्भुहस्तावतंसम्।
त्रिशिखममलमग्न्याकाशवायुस्वरूपं
हरिहरविधिरूपं चास्त्रराजं नमामि।।

160. स्थूपि ध्यानम्

उपानं पादुकं चैव जगदी जङ्घमेव च।
बाहुप्रस्तरसंयुक्तं ऊरू कण्ठश्च पम्कि।।
हृदयं कुमुदो जानू उरसी कम्बुसम्युतम्।
कुम्भपालिकनाभिस्तु मेड्रश्च वीरकान्तकम्।।
शिखरे देशमकुटं स्थूपिगोपुरमेव च।
विमानं स्थूपिसंयुक्तं ध्यानमावाह्य पूजयेत्।।

161. स्वामिविमान ध्यानम्

द्विपादं च त्रिनयनं भस्मकुण्ठितविग्रहम्।
शूलशक्तिधनुर्घण्टा पाशचक्रगदाब्जकम्।।

अष्टहस्तसमोपेतं सुपद्ममुकुटं तथा।
रक्तवर्णं विशालाक्षमुपानमङ्घ्रिरुच्यते।।
कुमुदं जङ्घदेशं च व्यालान्तं कटिदेशकम्।
कुक्षिं वै कुक्षिदेशं च पद्मान्तं मूर्ध्निरुच्यते।।
मकुटं मकुटोपेतं द्विपार्श्वं करमुच्यते।
एवं वै शिवरूपन्तु स्थूललिङ्गाकृतिं भजे।।

162. अम्बाविमान ध्यानम्

रुद्राणीं कुङ्कुमाभासां जटामकुटमण्डिताम्।
भीमरूपसमायुक्तां एकवक्त्रां चतुर्भुजाम्।।
दुकूलवसनोपेतां सर्वाभरणभूषिताम्।
पाशाङ्कुशसमायुक्तां साभयां वरदान्विताम्।।
विमानाधिष्ठितां देवीं पूजयेत् सर्वसिद्धये।।

163. गोपुर ध्यानम्

सहस्रबाहुसंयुक्तं सहस्रकिरणोज्वलम्।
खण्डेन्दुमौळिं सर्वेशं प्रतिवक्त्रं त्रिलोचनम्।।
स्फटिकाभन्तनो कान्त्या सहस्रपदसंयुतम्।
एवं ध्यात्वा विशेषेण पूजयेत्कुम्भमध्यमे।।

164. ध्वजदण्ड ध्यानम् (1)

एकश्च पादं द्विमुखं त्रिणेत्रं रोमावळीराजित दर्भरज्जुम्।
श्वेताङ्गरूपं शुकनासिकान्तमारूढ पद्मासन दण्डरूपम्।।

165. ध्वजदण्ड ध्यानम् (2)

पीठस्य पार्वतीदेवी दण्डस्य रुद्रदेवता।
यष्टिः स्कन्दसमायुक्तः उपदण्डो विनायकः।।

166. बलिपीठ ध्यानम्

शिरपञ्चसमवक्त्रसमनासिनयनं
दशकर्णदशबाहुदशशूलदशदृक्।
दळमेकहृदयमतिरक्तवर्णं
द्व्यपादमितिभूतबलिपीठरूपम्।।

167. बलिपीठशक्ति ध्यानम्

ज्वालासु केशामुख उग्रदन्ता सुवेदहस्ता ह्युरगञ्च बाणाम्।
चापं च पाशं दधती द्विहस्ता पादे च रक्ता बलिपीठशक्तिः।।

168. भैरवाष्ट नामानि

असिताङ्गो रुरुश्चण्डः क्रोधश्चोन्मत्तभैरवः।
कपाली भीषणश्चैव संहारश्चाष्टभैरवाः।।

169. भैरवमूर्ति ध्यानम् (1)

एकास्यं च चतुर्भुजं त्रिनयनं कृष्णं सुवृत्तेक्षणम्।
शूलं ब्रह्मकपालकं डमरुकं नागं वहन्तं करैः।।
ज्वालाकेशभयं करं शशिधरं दंष्ट्राकराळाननम्।
घण्टादामविभूषितं सुनयनं श्रीभैरवेशं भजे।।

170. भैरवमूर्ति ध्यानम् (2)

रक्तज्वालजटाधरं सुविमलं रक्ताङ्गतेजोमयम्।
धृत्वा शूलकपालपाशडमरुं लोकस्य रक्षाकरम्।।
निर्वाणं शुनवाहनं त्रिनयनं आनन्दकोलाहलम्।
वन्दे भूतपिशाचनाथवटुकं क्षेत्रस्य पालं शिवम्।।

171. चतुर्भुजभैरव ध्यानम्

नीलवर्णं त्रिणेत्रं च कटिसूत्रं तु सर्पकम्।
नग्नरूपं द्विपादं च श्वानवाहनसंयुतम्।।
चतुर्बाहुसमायुक्तं भीमरूपं जटाधरम्।
शूलं च डमरुकं चैव दक्षयोर्हस्तयोर्धृतम्।।
किङ्किणीमालया भूष्यं छन्नवीरं च नूपुरम्।
उग्ररूपं सुदंष्ट्रं च सर्वाभरणभूषितम्।।
क्षेत्रपालमिदं प्रोक्तं सर्वकामफलप्रदम्।।

172. अष्टभुजभैरव ध्यानम्

कृष्णाभं ज्वालकेशं त्रिनयनमुरगीभूषणं वृत्तनेत्रम्।
दिग्बाहुं चन्द्रचूडं डमरुकसहितं खड्गबाणौ च सव्ये।।
घण्टापाशौ कपालं धनुरपिकरैः बिभ्रतं मुण्डमालां
नग्नं रौद्रं सुदंष्ट्रं दनुजमदकरं भैरवाकारमीडे।।

173. हरिहरपुत्रमूर्ति ध्यानम्

द्विहस्तं पद्मसंस्थञ्च शुक्लयज्ञोपवीतिनम्।
पूर्णया पुष्कला देव्यायुक्तं शास्तारमाश्रये।।

174. शास्तामूर्ति ध्यानम्

श्यामवर्णशरीरसुयौवनां
तुङ्गभृङ्गसमुज्वलकुन्तळम्।
योगवेत्रसपद्मसुखासनं
वामपुष्कळ दक्षिणपूर्णयोः।।

175. शास्तामूर्ति ध्यानम्

आश्यामकोमळविशालतनुं विचित्रं
वासोवसानमरुणोत्पलवामहस्तम्।
उत्तुङ्गरत्नमकुटं कुटिलाग्रकेशं
शास्तारमिष्टवरदं शरणं प्रपद्ये।।

176. गजवाहनशास्तामूर्ति ध्यानम्

मदगजमधिरूढं भूतनाथं त्रिनेत्रं
सकलवरदनित्यं भक्तसेवा प्रसन्नम्।
कनकशिखरवर्णं स्वर्णदण्डं कुठारं
हरिहरसुतदेवं देवदेवं नमामि।।

177. महाशास्तामूर्ति ध्यानम्

शान्तं शारदचन्द्रकान्तिधवळं चन्द्राननं सुन्दरम्
वीणापुस्तकमक्षसूत्रवलयं व्याख्यानमुद्रां तथा।
बिभ्राणं करपङ्कजैः मदगजस्कन्दाधिरूढं
महाशास्तारं वरदं भजामि सततं त्रैलोक्यसम्मोहनम्।।

178. वरुणमूर्ति ध्यानम्

नागपाशधरं हृष्टं रत्नौघद्युतिविग्रहम्।
शशाङ्कधवळं ध्यायेत् वरुणं मकरासनम्।।

एकादशरुद्राः

179. एकादशरुद्रनामानि

महादेवो हरो रुद्रः शङ्करो नीललोहितः।
ईशानो विजयो भीमः देवदेवो भवोद्भवः।।
कपालीशश्च रुद्राः भवेदेकादशस्स्मृतः।।

180. महादेवरुद्रमूर्ति ध्यानम्

शुद्धस्फटिकसंकाशं त्रिणेत्रञ्च चतुर्भुजम्।
त्रिशूलञ्च कपालञ्च मृगटङ्कञ्च धारिणम्।।
जटाकपालसंयुक्तं व्याघ्रचर्मोत्तरीयकम्।
भस्मोद्धूलितसर्वाङ्गं महादेवमहं भजे।।

181. हररुद्रमूर्ति नामानि

पिङ्गाननं त्रिणेत्रञ्च मृगटङ्कसमन्वितम्।
ऊर्ध्वकेशं प्रलम्बोष्ठं भस्मकुण्ठितविग्रहम्।।
व्याघ्रचर्मपरीधानं हररुद्रमहं भजे।।

182. रुद्ररुद्रमूर्ति ध्यानम्

रौद्रं त्रिणेत्रं नीलाभं जटिनं सोमधारिणम्।
कपालं त्रिशिखं चैव मृगटङ्कञ्च धारिणम्।।

भस्मोद्धूलितसर्वाङ्गं सर्वाभरणभूषितम्।
गजचर्मपरीधानं रुद्ररुद्रमहं भजे।।

183. शङ्कररुद्रमूर्ति ध्यानम्

श्वेतं चतुर्भुजश्चैव जटाशोभिकलान्वितम्।
एकाननं त्रिणेत्रञ्च पद्मकुण्ठितविग्रहम्।।
कपालञ्च त्रिशूलञ्च मृगटङ्कञ्च धारिणम्।
व्याघ्रचर्मधरं रुद्रं शङ्कराख्यमहं भजे।।

184. नीललोहितरुद्रमूर्ति ध्यानम्

असिताङ्गं त्रिणेत्रं च ऊर्ध्वकेशं भयानकम्।
दंष्ट्राकराळवदनं सर्वाभरणभूषितम्।।
कपालं च त्रिशूलं च मृगटङ्कञ्च धारिणम्।
गजचर्मधरं देवं भजेऽहं नीललोहितम्।।

185. ईशानरुद्रमूर्ति ध्यानम्

शुद्धस्फटिकसंकाशं त्रिणेत्रञ्च चतुर्भुजम्।
जटाकपालसंयुक्तं भस्मकुण्ठितविग्रहम्।।
व्याघ्रचर्मपरीधानं सर्वाभरणभूषितम्।
कपालं च त्रिशूलं च मृगटङ्कञ्च धारिणम्।।
स्वामि सोमधरं देवमीशानान्तमऽहं भजे।।

186. विजयरुद्रमूर्ति ध्यानम्

विजयं पिङ्गवर्णाभं ज्वलत्केशं भयानकम्।
जटाकलापसंयुक्तं सर्वाभरणभूषितम्।।

गजचर्मपरीधानं भस्मकुण्ठितविग्रहम्।
कपालञ्च त्रिशूलञ्च मृगटङ्कञ्च धारिणम्।
दंष्ट्राकराळवदनं विजयं तं नमाम्यऽहम्।।

187. भीमरुद्रमूर्ति ध्यानम्

असितं भीमरुद्रं च ज्वलत्केशं भयानकम्।
दंष्ट्राकराळवदनं व्याघ्रचर्मोत्तरीयकम्।।
कपालञ्च त्रिशूलञ्च मृगटङ्कञ्च धारिणम्।
भस्मोद्धूळितसर्वाङ्गं भीमरुद्रमऽहं भजे।।

188. देवदेवरुद्रमूर्ति ध्यानम्

रक्ताभं देवदेवञ्च मणिबद्धजटान्वितम्।
कपालञ्च त्रिशूलञ्च मृगटङ्कञ्च धारिणम्।।
भस्मोद्धूलित सर्वाङ्गं सर्वाभरणभूषितम्।
गजचर्मोत्तरीयञ्च देवदेवमऽहं भजे।।

189. भवोद्भवरुद्रमूर्ति ध्यानम्

भवोद्भवञ्च श्वेताभमर्धचन्द्रकलाधरम्।
दंष्ट्राकराळवदनं व्याघ्रचर्मोत्तरीयकम्।।
कपालञ्च त्रिशलं च मृगटङ्कञ्च धारिणम्।
जटाकलापसंयुक्तं भवोद्भवमऽहं भजे।।

190. कपालीशरुद्रमूर्ति ध्यानम्

पिङ्गाभञ्च कपालीशं फणिबद्ध जटाधरम्।
दंष्ट्राकराळवदनं व्याघ्रचर्मोत्तरीयकम्।।

भस्मोद्धूलित सर्वाङ्गं सर्वाभरणभूषितम्।
अर्धचन्द्रधरं देवं कपालीशमऽहं भजे।।

191. तिरस्करणीदेवीमूर्ति ध्यानम्

नीलाश्वमुख्यमथिरुह्यविराजमाना
नीलांशुकाभरणमाल्यविभूषणाढ्या।
निद्रावशेन भुवनानि तिरोदधाना
खड्गायुधा भगवती परिपातु सा नः।।

192. नवग्रहस्थानम् (आगमोक्तम्)

बाह्यतः पूर्वतस्सोमं दक्षिणेन बुधं तथा।
पश्चिमेन गुरुं न्यस्य उत्तरेण च भार्गवम्।।
आग्नेय्यां मङ्गळं न्यस्य नैर्ऋत्यां तु शनैश्चरम्।
वायव्यां तु न्यसेद्राहुं केतुं ईशानगोचरे।।

193. सूर्यमूर्ति ध्यानम्

सूर्यं कुङ्कुमसंकाशं सर्वाभरणभूषितम्।
द्विनेत्रं चारुवदनं रक्तमाल्यानुलेपनम्।।
चतुर्भुजसमोपेतं परितश्चाम्बुजद्वयम्।
अभीतिवरदोपेतं प्रभामण्डलमण्डितम्।।
उपवीतसमायुक्तं उषाप्रत्युषान्वितम्।।

194. चन्द्रमूर्ति ध्यानम्

सोमं चतुर्भुजं श्वेतं केयूरमकुटोज्वलम्।
वरदाभय संयुक्तं कुमुदद्वयहस्तकम्।।
वासुदेवस्य नयनं शङ्करप्रियभूषणम्।।

195 . अङ्गारकमूर्ति ध्यानम्

रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः।
चतुर्भुजो मेषवाहः वरदश्च धरासुतः।।

196. बुधमूर्ति ध्यानम्

बुधः पुस्तकधारी च कुङ्कुमाभरणो हरिः।
पीताम्बरधरः स्रुग्वी पीतगन्धानुलेपनः।।

197. शनैश्चरमूर्ति ध्यानम्

कृष्णाम्बरधरं देवं द्विभुजं काकसंस्थितम्।
सर्वपीडाहरं नृणां ग्रहाणामुत्तमोत्तमम्।।

198. बृहस्पतिमूर्ति ध्यानम्

अभीष्टफलदं देवं सर्वज्ञं सुरपूजितम्।
सर्वकार्यार्थसिद्ध्यर्थं प्रार्थयेद्देवमन्त्रिणम्।।

199. राहुमूर्ति ध्यानम्

धूम्रं कराळवदनं विकटाङ्गभुजद्वयम्।
धूम्रवस्त्रधरं राहुं कृताञ्जलिपुटं यजेत्।।

200. शुक्रमूर्ति ध्यानम्

मृणाळधावळ्य समानगात्रं श्वेताम्बरं श्वेतसुगन्धपुष्पम्।
सुश्वेतरत्नाभरणैर्विभूषं शुक्रं महादैत्यगुरुं प्रसन्नम्।।

201. केतुमूर्ति ध्यानम्

शङ्करे तु पदे केतुः त्रिफणी खड्गखेटभृत्।
नरनागार्धदेही च धूम्रो वाथ कृताञ्जलिः।।

202. सूर्यमूर्ति ध्यानम्

सूर्यं सुन्दरलोकनाथममृतं वेदान्तसारं शिवम्।
ज्ञानः ब्रह्ममयं सुरेशममलं लोकैकचक्षुस्स्वयम्।।
इन्द्रादित्यनराधिपं सुरगुरुं त्रैलोक्यचूडामणिम्।
ब्रह्माविष्णुशिवस्यरूपहृदयं वन्दे सदा भास्करम्।।

203. चन्द्रमूर्ति ध्यानम्

श्वेताम्बरान्वितवपुं वरशुभ्रवर्णं
सुश्वेतयुक्तरथाङ्गं सुरसेविताङ्घ्रिम्।
दोर्भ्यां धृताभयकरं वरदं सुधांशुं
श्रीवत्समौक्तिकधरं प्रणमामि चन्द्रम्।।

204. अङ्गारकमूर्ति ध्यानम्

रक्तमाल्याम्बरधरं हेमरूपं चतुर्भुजम्।
शक्तिरूपं गदा पद्मं धारयन्तं कराम्बुजैः।।

205. बुधमूर्ति ध्यानम्

बुधश्चतुर्भिर्वरदो भयासि गदावहन्तं वरदं प्रशान्तम्।
पीतप्रभं चन्द्रसुतं सुरेशं सिंहो निषण्णं बुधमाश्रयामि।।

206. गुरुमूर्ति ध्यानम्

वराक्षमाला दण्डञ्च कमण्डलुधरं विभुम्।
पुष्यरागाङ्कितं पीतं वरदं भावयेद्गुरुम्।।

207. शुक्रमूर्ति ध्यानम्

जटिलं चाक्षसूत्रं च वरदण्डकमण्डलुम्।
श्वेतवस्त्रावृतं शुक्रं ध्यायेद्दानवपूजितम्।।

208. शनैश्चरमूर्ति ध्यानम्

नीलाम्बरो नीलवपुः किरीटी गृद्ध स्थितस्त्रासकरो धनुष्मान्।
चतुर्भुजं सूर्यसुतः प्रशान्तःसदास्तुलह्यं वरदः प्रसन्नः।।

209. राहुमूर्तिः

कराळवदनं खड्गचर्मशूलकरान्वितम्।
नीलसिंहासनस्थञ्च ध्यायेद्राहुं प्रशान्तये।।

210. केतुमूर्ति ध्यानम्

धूम्रवर्णं द्विबाहुञ्च केतुञ्च विकृताननम्।
गृद्धासनस्थितं नित्यं ध्यायेत्सर्वफलाप्तये।।

211. बालाम्बिका ध्यानम्

अरुणकिरणजालैरञ्जिताशावकाशा
विधृतजपवटिका पुस्तकाभीतिहस्ता।
इतरकरवराढ्या फुल्लकल्हारसंस्था
निवसतु हृदि बाला नित्यकल्याणशीला।।

212. ललिताम्बिका

सिन्दूरारुणविग्रहं त्रिनयनां माणिक्यमौळिस्फुरत्
तारानायकशेखरीं शशिमुखीं पीनोरुवक्षोरुहाम्।
पाणिभ्यां मधुपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीम्
पूर्णां रत्नघटस्थरक्तचरणां ध्यायेत्परामम्बिकाम्।।

213. श्यामळादेवी ध्यानम्

श्यामाङ्गाञ्च सुयौवनां त्रिनयनां संपूर्णचन्द्राननां
वामे गण्डिकयोरुकान्तदितरे रुद्राक्षमालाभयाम्।
पीनोत्तुङ्ग कुचां पयोधरां सुमकुटां पीताम्बरालङ्कृतां
वामाद्यष्टसुशक्तिभिः परिवृतां वन्दे महाशाम्बवीम्।।

214. शीतळादेवी ध्यानम्

वामे शूलं कपालं डमरुकसहितं चोर्ध्वकेशं करण्डं
खड्गं ताटङ्कयुग्मं स्तनभरयुगळं कञ्चुकं वह्निनेत्रम्।
रौद्रं वीरासनस्थं ज्वरभयदुरितं स्फोटकाधीनरोगं
सान्निध्यं निम्बवृक्षस्थितमरुणनिभं शीतळादेविरूपम्।।

215. शीतळादेवी ध्यानम्

अरुणमणिनिभाङ्गं चाग्निकेशां करण्डं
डमरुकधृतशूलं खड्गहस्तं कपालम्।
अनलनयननागं आसनं पद्मपीठम्
अखिलभुवनमाता शीतलादेविमीडे।।

216. मारियम्मन् ध्यानम्

डमरुकनरकपालं दक्षिणाभ्यां कराभ्यां
कनकझषकशूले वामतो धारयन्तीम्।
अरुणवसनदेहां वह्निकेशाब्जसंस्थाम्
अखिलभुवनमातुः मारिकादेविरूपम्।।

217. गङ्गादेवी ध्यानम् (1)

सितमकरनिषण्णां शुभ्रवर्णां त्रिणेत्रां
करधृतकलशोद्यऽस्तोत्पलाभीत्यभीष्टाम्।
विधिहरिहररूपां सेन्दुकोटीरजूटां
कलितसितदुकूलां जाह्नवीम्बां नमामि।।

218. गङ्गादेवी ध्यानम् (2)

मकरासनगां गङ्गां सव्यवामकरद्वये।
नीलोत्पलं पूर्णकुम्भं दधतीं शुक्लरूपिणीम्।।

219. अन्नपूर्णादेवी ध्यानम्

अर्कोन्मुक्त शशाङ्ककोटिवदनामापीनतुङ्गस्तनीं
चन्द्रार्धाङ्कितमस्तकां मधुमदामालोलनेत्रत्रयीम्।
बिभ्राणामणिशं वरं जपवटीं शूलं कपालं करै-
राध्यां यौवनगर्वितां लिपितनुं वागीश्वरीमाश्रये।।

220. देवी ध्यानम् (1)

ह्रींकारासनगर्भितानलशिखां सौंक्लींकलां बिभ्रतीं
सौवर्णाम्बरधारिणीं वरसुतां धौतां त्रिणेत्रोज्वलाम्।
वन्दे पुस्ककपाशमङ्कुशधरां स्रग्भूषितामुज्वलां
त्वां गौरीं त्रिपुरात्परात्परकळां श्रीचक्रसञ्चारिणीम् ।।

221. देवी ध्यानम् (2)

सौवर्णाम्बुजमध्यगां त्रिनयनां सौदामिनीसन्निभां
शङ्कं चक्रवराभयञ्च दधतीं इन्दोः कलां बिभ्रतीम्।
ग्रैवेयाङ्गद हारकुण्डलधरां आखण्डलाद्यैस्तु तां
ध्यायेत्बिन्दुनिवासिनीं शशिमुखीं पार्श्वस्थ पञ्चाननाम्।।

222. देवी ध्यानम् (3)

श्यामाभां सुयौवनां त्रिनयनां सम्पूर्णचन्द्राननां
वामे गण्डिकमूरुकैतदितरे रुद्राक्षमालाभयौ।
पीनोत्तुङ्गकुचां जटामकुटकां पीताम्बरालङ्कृतां
वामाद्यष्टसुशक्तिभिः परिवृतां वन्दे महाशाम्भवीम्।।

223. देवी ध्यानम् (4)

इन्दुनिभवेदकरवह्निनयनं स्यात्
पङ्कजवराभय जपाक्षसरयुक्तम्।
अङ्गहिमभूषणविचित्रनयनं स्यात्
तुङ्गमकुटोज्वलमनोन्मनी स्वरूपम्।।

224. देवी ध्यानम् (5)

इक्षुकोदण्डपुष्पेषु पाशाङ्कुशचतुर्भुजाम्।
उद्यत्सूर्यनिभां देवीं वन्दे त्रिपुरसुन्दरीम्।।

225. देवी ध्यानम् (6)

पद्माक्षमालामभयमूरुहस्तां श्यामां त्रिनेत्रामतिसुन्दराङ्गीम्।
करण्डिकाद्याभिजटेन्दुभूषां श्रीकामकोटिं शिवशक्तिमीडे।।

226. देवी ध्यानम् (7)

पाशाङ्कुशाख्य वरदाभयहस्तयुक्तां
पीताम्बरीं कनकमौक्तिकभूषणाङ्गीम्।
आषोडशाक्षरदळावृतपद्मसंस्थां
एकाक्षरीं त्रिभुवनाधिपधर्मपत्नीम्।।

227. देवी ध्यानम् (8)

चतुर्भुजां त्रिणेत्राञ्च समुन्नतपयोधराम्।
वरदाभयहस्ताञ्च पद्मद्वयकरद्वयाम्।।
सर्वाभरणसंयुक्तां शम्भुशक्तिमहं भजे।।

228. देवी ध्यानम् (9)

एकमुखवेदकरवह्निनयनं स्यात् पङ्कजवराभयकरोत्पलचतुष्कम्।
अङ्गहिमभूषणविचित्रवदनं स्यात् तुङ्गमकुटोज्वल मनोन्मनीस्वरूपम्।।

229. देवी ध्यानम् (10)

सर्वालङ्कारयुक्तां सरसपदयुतां साधुवृत्तां सुवर्णां
सद्भिस्संस्तूयमानां सरसगुणयुतां लक्षितां लक्षणाढ्याम्।
उद्यद्भूषां विशेषामुभगतविनयां द्योतमानार्धरेखां
कल्याणीं देवगौरीं प्रियममकवितां कन्यकां त्वां गृहाणाम्।।

230. कालीदेवी ध्यानम् (1)

चतुर्भुजां त्रिणेत्रां च काळकण्ठीश्च कर्णिकाम्।
दंष्ट्राकराळवदनां व्याघ्रचर्माम्बरावृताम्।।
खेटकं शूलहस्तश्च कपालं डमरुं धृताम्।
किङ्किणीमालयायुक्तां भजेत्काळीं वरप्रदाम्।।

231.वरुणध्यानं

चन्द्रप्रबं पङ्कज सन्निविषं पाशाङ्कुशोऽबीतिवरान् दधानम् ।
मुत्काकलापान्जित सर्वगात्रम् ध्यायेत् प्रसबं वरुणम् सुवृत्वै ।।

232. पाशुपतास्त्र द्यानम्

पन्चवक्रं महाधोरं हशमाहुं त्रिलोचनम्
विकृतं मास्करं चोग्रंपिगंमशृ मूर्धजम् ।
खङ्ग खेटक नाराचं धनुस्सूत्रकमण्डलम् ।
शक्तित्रिशूलंपरशुं ब्रहमदण्डकरान्निलम्।
ध्यात्वा पाशुपतं देवं साङ्गं संपूजयेध्बुधः ।।

233. कालीदेवी ध्यानम् (4)

श्यामाभां रक्तवस्त्रां ज्वलनशिरभुजाम् अष्टहस्तां त्रिणेत्राम्
शूलं वेताळखड्गं डमरुकसहितां वामहस्ते कपालम्।
अन्यत्घण्टोर्ध्वखेटम् अनलवदनां रौद्रभावं त्रिणेत्राम्
चामुण्डारूपमेतत् भुवनभयकरीं भद्रकालीं नमामि।।

234. शंखाधिदेवता नामानि (ध्यानं)

शखं चन्द्रार्क दैवत्यं मध्ये बरुणदैवतम्।
प्रृष्टे प्रजापतिम् दध्यात् अग्रे रागां सरस्वति
शङ्खाग्रे सर्वतीर्थानि तस्तात् शंख प्रपूजयेत् ।।

235. पीठारी ध्यानम् (काली)

अरुणमनिनिभाङ्गमग्निकेशं करण्डं
डमरुकधृतपाशं शूलहस्तं कपालम्।
अनलनयननागं वीरसिंहासनस्थम्
अखिलभुवनमाता कालिदेव्यास्स्वरूपम्।।

236. सिद्धलक्ष्मीदेवी ध्यानम्

अभयवरदयुक्तामब्जयुग्मं दधानां
सरसकमलवासीं रत्नताटङ्कभूष्याम्।
अरुणसदृशवर्णामच्युतप्राणनाथां
सकलविबुधवन्द्यां सिद्धलक्ष्मीं नमस्ते।।

237. आदिलक्ष्मी ध्यानम्

द्विभुजां च द्विनेत्रां च पद्माभयवरान्विताम्।
पुष्पमालासमायुक्तां प्रभामण्डलमण्डिताम्।।
सर्वलक्षणसम्पन्नां सर्वाभरणभूषिताम्।
सुन्दरीमादिलक्ष्मीं च अष्टमङ्गलसंयुताम्।।

238. सन्तानलक्ष्मी ध्यानम्

जटामकुटसंयुक्तां स्थिरासनसमन्विताम्।
अभयं खड्गखेटञ्च वरदञ्च चतुर्भुजे।
कञ्चुकच्छन्नवीरैश्च मौक्तिकाभरणोज्वलैः।
दीपचामरधारीभिःपार्श्वद्वयविराजिताम्।।

239. गजलक्ष्मी ध्यानम्

लाक्षारससवर्णाभां पद्मद्वयविराजिताम्।
अभयं वरदं चैव करण्डमकुटान्विताम्।।
पद्मासनस्थितां चैव व्याकीर्णकुन्तळावृताम्।
सव्यदक्षिणपार्श्वे च गजतुण्डाभिषेचनीम्।।

240. धनलक्ष्मी ध्यानम्

किरीटमकुटसंयुक्तां स्वर्णाभां च सुयौवनाम्।
चक्रं बाणं च ताम्बूलं दक्षिणेन करेण तु।।
शङ्खं चैव धनुःकुण्डीं धारयेत् करवामके।
स्तनकञ्चुकसंयुक्तां सर्वाभरणभूषिताम्।।

241. धान्यलक्ष्मी ध्यानम्

अभयं वरदं चैव किरीटमकुटान्विताम्।
अम्बुजं चेक्षुशालीं च कदळीफलद्रोणिकाम्।।
अङ्गतं दक्षवामे तु श्वेतरूपां च धारिणीम्।
कृपामूर्तिं गजारूढां सर्वालङ्कारसंयुताम्।।

242. विजयलक्ष्मी ध्यानम्

अब्जबाहुयुतां लक्ष्मीं सिंहासनसुसंस्थिताम्।
स्वर्णाभां च द्विनेत्रां च एकवक्त्रां भुजाष्टकाम्।।
खड्गं पाशं च चक्रं च चाभयं सव्यहस्तके।
खेटकं चाङ्कुशं शङ्खं वरदं वामहस्तके।
हंसवाहनमासीनां पुष्पमालाभिरावृताम्।।

243. ऐश्वर्यलक्ष्मी ध्यानम्

अश्वारूढां महालक्ष्मीं चतुर्भुजसमन्विताम्।
स्वर्णवर्णधरां देवीं स्तनकञ्चुकसंयुताम्।।

244. वीरलक्ष्मी ध्यानम्

अष्टबाहुयुतां लक्ष्मीं सिंहासनसुसंस्थिताम्।
अभयं वरदं चैव हस्तद्वन्द्वे च धारिणीम्।।
चक्रं बाणं च शूलं च धनुः शङ्खं कपालकम्।
सर्वलक्षणसम्पन्नां तप्तकाञ्चनसन्निभाम्।।

245. सरस्वती देवी ध्यानम्

श्रीमच्छन्दनचर्चितो ज्वलवपुः शुक्लाम्बरा मल्लिका।
माला लालितकुन्तळा प्रविलसन्मुक्तावली शोभना।।
सर्वज्ञान निधानपुस्तकधरा रुद्राक्षमालाङ्किता।
वाग्देवी वदनाम्बुजे वसतु मे त्रैलोक्यमाता शुभा।।

246. अश्विनीनक्षत्र ध्यानम्

अश्विनौ देवते श्वेतवर्णौ तौ द्विभुजौ स्तुमः।
सुधासम्पूर्णकलशकराब्जौ अश्ववाहनौ।।

247. भरणीनक्षत्र ध्यानम्

पाशदण्डोज्वलभुजद्वयं महिषवाहनम्।
यमं नीलतनुं भीमं भरणीदेवतां भजे।।

248. कृत्तिकानक्षत्र ध्यानम्

कृत्तिकादेवतामग्निं मेषवाहनसंस्थिताम्।
स्रुक्स्रुवाभीतिवरधृक् चतुर्हस्तं नमाम्यहम्।।

249. रोहिणीनक्षत्र ध्यानम्

प्रजापतिश्चतुर्बाहुः कमण्डल्वक्षसूत्रधृक्।
वराभयकरश्शुद्धो रोहिणी देवतास्तु मे।।

250. मृगशीरोनक्षत्र ध्यानम्

श्वेतवर्णाकृतिस्सोमो द्विभुजो वरदण्डभृत्।
दशाश्वरथमारूढो मृगशीर्षोस्तु मे मुदे।।

251. आर्द्रानक्षत्र ध्यानम्

रुद्रश्वेतवृषारूढः श्वेतमाल्यश्चतुर्भुजः।
शूलखड्गाभयवरान् दधानो मे प्रसीदतु।।

252. पुनर्वसुनक्षत्र ध्यानम्

अदितिः पीतवर्णा च स्रुक् स्रुवं दर्भसंयुतम्।
दधानो शुभदा भूयात् पुनर्वसुकृताऽऽह्वया।।

253. पुष्यनक्षत्र ध्यानम्

वन्दे बृहस्पतिं पुष्यदेवतां मानुषाकृतिम्।
सर्वाभरणसम्पन्नं देवमन्त्रिणमादरात्।।

254. आश्लेषानक्षत्र ध्यानम्

सर्पो रक्तः त्रिणेत्रश्च फलकाऽसि करद्वयः।
आश्लेषा देवतापीताम्बरधृक् वरदोऽस्तु मे।।

255. मघानक्षत्र ध्यानम्

पितरः पिण्डहस्ताश्च कृशा धूम्राः पवित्रिणः।
कुशलं दद्युरस्माकं मघा नक्षत्रदेवताः।।

256. पूर्वफल्गुनीनक्षत्र ध्यानम्

सम्पूजयाम्यर्यमणं फल्गुनीतारदेवताम्।
धूम्रवर्णरथारूढं सशक्ति करसम्युतम्।।

257. उत्तरफल्गुनीनक्षत्र ध्यनाम्

भगंवररथारूढं द्विभुजं शङ्खचक्रिणम्।
फल्गुनीदेवतां ध्यायेत् भक्ताभीष्टवरप्रदाम्।।

258. हस्तनक्षत्र ध्यानम्

सवितारमहं वन्दे सप्ताश्वरथवाहनम्।
पद्मासनस्थम् एकास्यं हस्तनक्षत्रदेवताम्।।

259. चित्रा नक्षत्र ध्यानम्

त्वष्टारं रथमारूढं चित्रानक्षत्रदेवतम्।
शङ्खचक्रान्वितकरं किरीटिनमहं भजे।।

260. स्वातीनक्षत्र ध्यानम्

वायुं मृगवरारूढं स्वातीनक्षत्रदेवताम्।
खेटचर्मोज्वलकरं धूम्रवर्णं नमाम्यहम्।।

261. विशाखानक्षत्र ध्यानम्

इन्द्राग्नी शुभदौस्यातां विशाखा देवते उभौ।
नमाम्येकरथारूढौ वराभीतिकराम्बुजौ।।

262. अनूराधानक्षत्र ध्यानम्

शूलाङ्कुशधरं बाह्वोः देवं शोणितवर्णकम्।
मित्रं पद्मासनारूढम् अनूराधेश्वरं भजे।।

263. ज्येष्ठानक्षत्र ध्यानम्

इन्द्रं गजवररथारूढं वज्रपाशवराभयम्।
करैश्चतुर्भिर्दधतं ज्येष्ठाधीश्वरमाश्रये।।

264. मूलानक्षत्र ध्यानम्

कराळवदनं कृष्णं यातुधानं नृवाहनम्।
ऊर्ध्वकेशं विरूपाक्षं भजे मूलाधिदेवताम्।।

265. पूर्वाषाढानक्षत्र ध्यानम्

अषाढा देवतानित्यं आपस्सन्तु शुभप्रदाः।
समुद्रगास्तरङ्गिण्यः पावन्यस्सर्वदेहिनाम्।।

266. उत्तराषाढानक्षत्र ध्यानम्

विश्वान्देवानहं वन्देऽषाढानक्षत्रदेवताम्।
श्रीपुष्टिकीर्तिधीदात्रीं सर्वपापापनुत्तये।।

267. श्रवणनक्षत्र ध्यानम्

शान्ताकारं चतुर्हस्तं श्रोणानक्षत्रवल्लभम्।
विष्णुं कमलपत्राक्षं ध्यायेत्गरुडवाहनम्।।

268. श्रविष्ठानक्षत्र ध्यानम्

श्रविष्ठादेवतां वन्दे वसून रथवराश्रितान्।
शङ्खचक्राङ्कितकरान् किरीटाङ्कितमस्तकान्।।

269. शतभिषक नक्षत्र ध्यानम्

वरुणं सन्ततं वन्दे सुधाकलशधारिणम्।
पाशहस्तं शतभिषग्देवतां देववन्दितम्।।

270. पूर्वप्रोष्ठपदानक्षत्र ध्यानम्

शिरसाऽह्मजं वन्दे ह्येकपादं तमोपहम्।
मुदे प्रोष्ठपदेशानं सर्वदेवनमस्कृतम्।।

271. उत्तरप्रोष्ठपदानक्षत्र ध्यानम्

अहिर्मेबुद्ध्नयोभूयान्मुदे प्रोष्ठपदेश्वरम्।
शङ्खचक्राङ्कितकरः किरीटोज्वलमौळिमान्।।

272. रेवतीनक्षत्र ध्यानम्

पूषाणं सततं वन्दे रेवतीशं समृद्धये।
वराभयोज्वलकरं रत्नसिंहासनस्थितम्।।

273. देवी ध्यानम्

नीलरत्ननिभां पद्मजपाक्षवरदाभयान्।
दधतीं चन्द्रमकुटां ध्यायेद्देवीं मनोन्मनीम्।।

274. दुर्गादेवी ध्यानम्

मातर्मे मधुकैटभघ्निमहिषप्राणापहारोद्यमे
हेलानिर्मितधूम्रलोचनवधे हे चण्ड मुण्डार्दिनी।
निश्शेषी कृतरत्नबीजदनुजे नित्ये निशुम्भावहे
शुम्भध्वंसिनि संहरादि दुरितं दुर्गे नमस्तेऽम्बिके।।

275. लक्ष्मीदेवी ध्यानम्

या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी
गम्भीरावर्तनाभिः स्तनभरनमिता शुभ्रवस्त्रोत्तरीया।
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैः स्नापिता हेमकुम्भैः
नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता।।

276. श्रीकृष्ण ध्यानम्

बालायनीलवपुषे नवकिङ्किणीक जालाभिरामजघनाय दिगम्बराय।
शार्दूलदिव्यनखभूषणभूषिताय नन्दात्मजाय नवनीतमुषे नमस्ते।।

277. कावेरीदेवी ध्यानम्

अच्छस्वच्छवसद्दुकूलवसनां पद्मासना ध्यासिनीं
हस्तन्यस्तवराभयाब्जकलशां राकेन्दु कोटिप्रभाम्।
भास्वद्भूषणगन्धमाल्यरुचिरां चारुप्रसन्नाननाम्
श्रीगङ्गादिसमस्ततीर्थनिलयां ध्यायामि कावेरिकाम्।।

278. श्रीवेङ्कटेश ध्यानम्

ध्यायेच्छ्रीवेङ्कटेशं कलिमलहरणं काञ्चनाराधिताङ्घ्रिं
शेषाद्रौ सन्निविष्टं चिरमपिरमया भूमि वैकुण्ठनाथम्।
सुब्रह्मण्यं सुरेशं सकलमुनिगणैस्सेवितं मन्त्रमूर्तिं
भक्तेष्टार्थप्रदानप्रवततयशं विष्णुं अर्चावतारम्।।

279. नरसिंहमूर्ति ध्यानम्

सिंहास्यं तीक्ष्णदंष्ट्रं त्रिणयनमुदयाद्भानुकोटिप्रकाशं
हस्तैर्दम्भोळिधारा पटुशितनखरैः दैत्यवक्षोविदार्यम्।
दत्वा देवव्रजस्याभयमपिवरं शब्दचक्रे दधानं
लक्ष्मीयुक्तं प्रशान्तं स्रितजनसुलभं विष्णुमाद्यं नमामि।।

280. आञ्जनेयमूर्ति ध्यानम्

वन्दे विद्युज्वलनविलसत् ब्रह्मसूत्रैकनिष्ठं
कर्णद्वन्द्वे कनकरचिते कुण्डले धारयन्तम्।
सत्कौपीनं कपिचरममृतं कामरूपं कपीन्द्रम्
पुत्रं वायोरिनसुतसुखदं वज्रदेहं वरेण्यम्।।

281. सुब्रह्मण्यमूर्ति ध्यानम्

गाङ्गेयं वह्निगर्भं शरवणजनितं ज्ञानशक्तिं कुमारं
ब्रह्मण्यं स्कन्ददेहं गुहमभिलषितं रुद्रतेजस्स्वरूपम्।
सेनानिं तारकघ्नं गजमुखसहजं कार्तिकेयं षडास्यं
सुब्रह्मण्यं मयूरध्वजरथसहितं देवदेवं नमामि।।

282. देवी ध्यानम्

त्रिणेत्रां द्विभुजां श्यामां गौरीं दक्षकरोत्पलाम्।
द्विपादेन समासीनां लम्बवामकरान्विताम्।।
उत्पल्लोत्पलपत्राभां विस्तीर्णायतलोचनाम्।
पूर्णचन्द्राभवदनां नीलकुञ्चितमूर्धजाम्।।

नीलोत्पलदळप्रख्य चन्द्रार्धकृतशेखराम्।
भुक्तिमुक्तिप्रदां देवीं सच्चिदानन्दरूपिणीम्।।

सदाशिवेश्वहर श्रीशद्रुहिनमातराम्।
समस्तवाणी लक्ष्म्यादि शक्ति चक्रस्यनायिकाम्।।
सर्वाभरणसंयुक्तां भावयेत्तु विचक्षणः।।

283. महालक्ष्मी ध्यानम्

चतुर्भुजां महालक्ष्मीं जगत्रयसुपूजिताम्।
पद्मासनां पद्महस्तां वरदाभयसंयुताम्।।
सव्यदक्षिणपार्श्वे च गजतुण्डाभिषेचनीम्।
स्तनकञ्चुकसंयुक्तां किरीटमकुटान्विताम्।।
सर्वाभरणसंयुक्तां महालक्ष्मीं विभावयेत्।।

284. कात्तायी (अम्मन्) ध्यानम्

द्विभुजाञ्च द्विनेत्राञ्च सरत्नमकुटोज्वलाम्।
दक्षिणे पद्मसंयुक्तां वामे लम्बकरान्विताम्।।
वीरेण रक्षितां देवीं श्यामाभां च सुयौवनाम्।।

285. द्रौपती ध्यानम्

कृष्णवर्णां विशालाक्षीं सर्वावयवसुन्दरीम्।
ध्रुपतात्मजां सुलाभां च रक्तपुष्पैस्सुशोभिताम्।।
भक्ताभीष्टवरां देवीं कृष्णां तुभ्यं नमो नमः।।

286. अङ्गाळी ध्यानम्

करण्डमकुटां देवीं त्रिणेत्रां च चतुर्भुजाम्।
डमरुं पाशशूलञ्च कपालञ्च करं तथा।।
दक्षिणे शयनं पादं वामपादेन कुञ्चितम्।
श्यामळं सर्वभूषाढ्यं अङ्गाळीं च नमोस्तु ते।।

287. पेरियाण्डवर् ध्यानम्

वन्दे राजस्वरूपं त्रिणयनं बालार्ककोटिप्रभम्।
हस्ते पुस्तकधारिणं जपमणिं रुद्रं च तेजोज्वलम्।।
वीणादण्डधरं जटामकुटकं पीताम्बरालङ्कृतम्।
भक्ताभीष्टवरप्रदं भयहरं भवेत् मुनीशं भजे।।

288. काली ध्यानम्

या भस्मोद्धूलताङ्गी भुजगपरिवृता व्याघ्रचर्मोत्तरीया
निर्मांसी मांसभक्षी सितनरशिरोमुण्डमाला कराळी।
चामुण्डा रक्तवर्णा शवशयनिरतां भक्तमुण्डप्रचण्डा
निस्सङ्गी कोटराक्षी भयदुरितकरी भद्रकाळी प्रसन्ना।।

289. पच्चैयम्मन् ध्यानम्

नीलोत्पलदळ श्यामां प्रलम्बितकरान्विताम्।
द्विनेत्रां पीतवस्त्राढ्यां स्वर्णताटङ्कसंयुताम्।।
वामे नीलोत्पलञ्चैव दधतीं कान्तिशोभिताम्।
कञ्चुकाभरणैर्युक्तां महामल्लीं विभावयेत्।।

290. इरुळन् ध्यानम्

निशिनाथस्वरूपन्तु केशपाशाळिनेत्रकाः।
खड्गदण्ड द्विहस्ताश्च पादुकं स्थानकं भवेत्।।
किङ्किणीकट्यधातारी निशिनाथं च भावयेत्।।

291. करुप्पर् ध्यानम्

द्विभुजश्च द्विनेत्रश्च कृष्णवर्णं महाबलम्।
किङ्किणीमालयायुक्तं खड्गहस्तं भयानकम्।।

292. पिटारी (पीडापहारी) ध्यानम्

पाशं डमरुकञ्चैव कपालञ्च त्रिशूलकम्।
त्रिणेत्रं ऊर्ध्वकेशञ्च चामुण्डी संप्रपूजयेत्।।

293. श्रीशबरिगिरिशास्तृ ध्यानम्

ओङ्कारनादं हरिहरसुतं कोटिचन्द्रप्रकाशम्
चिन्मुद्रां योगहस्तं ज्योतिरूपं त्रिणेत्रम्।।
शबरिगिरिनिवासं सर्वपापक्षमस्वं
हरिहरसुतपादं करचरणमनसा स्मरामि।।

294. श्रीराजराजेश्वरी ध्यानम्

इक्षुकोदण्डहस्तेषु पुष्पबाणसमन्विताम्।
पाशञ्च अङ्कुशं हस्ते सव्यपादेन लम्बिताम्।
पार्श्वे सिंहनिवासिं च सर्वालङ्कारभूषिताम्।
पीठाग्रे च महामेरुं राजराजेश्वरीं भजे।।

295. स्वामि ध्यानम्

पीठं यस्य धरित्री जलधरकलशैः लिङ्गमाकाशरूपं
नक्षत्रं पुष्पमालाग्रहगणकुसुमं नेत्रचन्द्रार्कवह्निम्।
कुक्षिं सप्तसमुद्रं भुजगिरिशिखरं सप्तपातालपादं
वेदं शास्त्रं षडङ्गं दशदिशिवदनं लिङ्गरूपं नमामि।।

296.नृत्तमूर्ति ध्यानम्

त्रिणेत्रं चतुर्भुजं शान्तं रक्तवर्णं स्मिताननम्।
करोटि बकपुष्पञ्च दुर्दूरश्चार्कपुष्पकम्।।
बालचन्द्रजटायुक्तं दक्षिणे जाह्नवीधरम्।
सर्पक्रीडसमायुक्तं अपस्मारोपरिस्थितम्।।
दक्षिणं कुञ्चितं पादं वामपादं तदूर्ध्वकम्।
वामकर्णे च चक्रञ्च दक्षिणे नक्रकुण्डलम्।
अभये फणिसंयुक्तं अन्ये डमरुकं परम्।।
लम्बितं वामहस्तन्तु अग्निहस्तं तदूर्ध्वके।
एवञ्च नृत्तरूपन्तु ध्यानमन्त्रेण पूजयेत्।।

297. नटराज ध्यानम्

सङ्कीर्णजटमिन्दु हेमकुररि मुण्डास्तिते वाबगा
श्वेतार्कद्रुमराजपिञ्छिकधरं वैयाघ्रकृत्यम्बरम्।
सर्पं सव्यकरे वराभये डमरुकं वामप्रसार्यान्यकं
वामेग्निं दधतं शयानभरितमपस्मारपृष्ठस्थितम्।।

298. नटराज ध्यानम्

वक्रीकृत्य सुदक्षिणं च चरणं चोद्धृत्यवामं प्रभा
मध्यस्थं रवकिङ्किणीमणितुला कोटिस्फुरत्पादुकम्।
दक्षेनक्रसकुण्डलं श्रुतिपुटे वामे तु पत्रान्वितं
भस्मालिप्तमुमायुतं त्रिणयनं देवं नटेशं भजे।।

299. काळीताण्डव ध्यानम्

किञ्चित्कुञ्चितवामपादनिचयं मञ्जीरमञ्जुत्क्वनात्
चञ्चत्काञ्चनकिङ्किणीरणारवञ्रं च गद्रञ्च तम्।
काळीताण्डवखण्डनं प्रविलसत रक्तोल्लसत्कुण्डलं
चण्डं रक्षित चणधिका प्रतिकृतं संपत्करं ताण्डवम्।।

300. कल्याणसुन्दरस्वामि ध्यानम्

शम्भोर्दक्षिणहस्तपार्वतियुतं श्रीभूमिदेव्याश्रयम्।
धाता वह्निपुराननोस्थितहरिं वामे सहस्तोदकम्।।
घोषैः पादैः सिकेयनृत्यविलसत् इन्द्रादिदेवैस्थितं
वृष्या पुष्पकृताञ्जलिं वरवृतं कल्याणमूर्तिं भजे।।

301. कल्याणसुन्दरशक्ति ध्यानम्

कल्याणरूपां कमनीयवेषां शिवेन सव्ये तु करे गृहीताम्।
मन्त्राक्षमन्त्राननचारुवक्त्रां गौरीं त्रिभङ्गीं मनसा स्मरामि।।

301. भैरव ध्यानम्

पादो पादुकभूषितं प्रतिपदं न्यासन्वहन्नूपुरम्।
हस्तौ शूलकपालसन्निडमरून् कर्णौ च ताटङ्किणौ।
गात्रं लम्बितकञ्चुकं सतिलक वक्त्रं च वक्राळकं
यस्यस्तोभरणी दिने च धृततनुं तं भैरवं भावयेत्।।

302. त्रिपुरारिमूर्ति ध्यानम्

विद्रुमाङ्गविलसत् त्रिणेत्रकं बाणकृष्ण मृगटङ्कचापधृत्।
उद्धृताङ्घ्रि मम सर्व्यस्वस्तिदं मन्दहासदहनं पुरान्तकम्।।

303. त्यागराज द्यानम्

पुष्पोष्णीषधरं सुन्दरोप धानाञ्चितं शुभम्।
पिहितांध्रि करारम्भोजं नानाभरणमुषितम्।
रा नसिहांसनारूदं हाटकक्षेत्र शोपितम्।
त्यागराजेति बिख्यातम् सोमास्कन्दमहं मजे ।।

304. त्रिपुरारिमूर्ति ध्यानम्

प्रहसितवदनेकं सूर्यकोटिप्रकाशं करतलहरिणटङ्कं चापबाणं चतुष्कम्।
शशिनिथिमकुटचूडं चन्द्रवज्रेण कान्तिं त्रिपुरचरणवामं कुञ्चितं स्थानसव्यम्।।

305. त्रिपुरारिमूर्ति ध्यानम्

प्रहसितवदनेकं सूर्यकोटिप्रकाशं करतलधृतकृष्णं टङ्ककोदण्डबाणम्।
त्रिपुरदहनमीडे चोदृ ताङ्घ्रिन्तु सव्ये स्थितवरपदमीशं चन्द्रचूडं त्रिणेत्रम्।।

306. वीरभद्र ध्यानम्

नीलं नीलाम्बुवर्णं विकसितवदनं नीलकण्ठं त्रिणेत्रं
कालं कालाग्निरुद्रं करतलकमलं खड्गखेटं कपालम्।
भीमं भीमाट्टहासं त्रिभुवनविजयं वीरभद्रं प्रसन्नं
वन्देऽहं शङ्कराख्यं सकलरिपुहरं दक्षसंहारवीरम्।।

307. अर्धनारी ध्यानम्

पुंस्त्रीरूपधरं तनौ शशिजटा टङ्कारुणाभं फणिं
व्याघ्रत्वक्कसनं प्रकोष्टवृषभं वक्राङ्गिकं दक्षिणे।
वामे श्यामवरोत्पलाळककुचौ क्षौमार्जुपादाम्बुजः
भ्राजर्थारविभूषणादिरुचिरं वन्देऽर्धनारीश्वरम्।।

308. अर्धनारी ध्यानम्

सव्यप्रभाळनिभसव्यसुकृष्णवर्णं
चर्माम्बरं कनकममम्बर सव्य सव्यम्।
सव्यापहं परशुदश्वचमुत्पलञ्च
सर्वं पयोधरयुतं तं उमेशरूपम्।।

309. किरातमूर्ति ध्यानम्

कृष्णाङ्गं द्विभुजं धनुश्शरधरं सकर्णकुसुमं शार्दूलचर्माम्बरम्।
बन्ध व्याळ विराजितो तरमहं ध्यायेत् किरातं हरम्।।

310. किरातमूर्ति ध्यानम्

कृष्णाङ्गं द्विभुजं धनुशशिधरं मुक्तालकं सुस्थितम्
क्रूराक्षिद्वयसंयुतं विपुलसत वक्रं च परस्त्रीर्णकम्।

शिष्ये चिश्चधरं सकर्णकुसुमं शार्दूलचर्माम्बरम्
बन्धव्याळविराजितो तरमहं ध्यायेत् किरातं भजे।।

311. कङ्काळ मूर्ति ध्यानम्

रक्ताभं वक्रमकुटं वामे तु दोर्दण्डके
त्र्यक्षं देवकराम्बुजं शतधृतैः कङ्काळवीणाधरम्।
सव्ये यष्टिरधरं वरे डमरुकं सव्यापसव्यक्रमात्
टङ्कं कृष्णमृगं दधानमनिशं कङ्काळदेवं भजे।।

312. कङ्काळमूर्ति ध्यानम्

भस्मालेपनमस्तकं विपुलसत् सिन्दूरचित्रान्वितम्
टङ्कं वामकरेषु सव्येषु प्रहरं शार्दूल चर्माम्बरम्।
शूलं कृष्णमृगञ्च लम्बितकरं चूडेन्दुबन्धं स्फुरत्
धानन्देवपुरेद्य योमितिपुरैः भूतादि लीलामृतम्।।

313.कङ्काळमूर्ति ध्यानम्

करस्य शूलेन सुगन्धविष्णुं मृगे च दक्षकरेण दूर्वा।
पूर्वापरौ वल्यपाद्यघोषं कङ्काळवेषं गमनं भजामि।।

314.चण्डेशानुग्रहमूर्ति ध्यानम्

त्र्यक्षं चन्द्रमौलिं स्फटिकमणिनिभं टङ्कं कृष्णं दधानं
सव्ये लम्बङ्घ्रिशोभं शयितपरवतं पद्मपीठोपरिस्थम्।
हस्ताभ्यां पुष्पमालां सहितगिरिसुतं धारयन्तं वृषस्थं
सुच्छत्रं चण्डकण्डोसुरवरविनुतं चण्डनाथं भजेऽहम्।।

315.विषापहरणमूर्ति ध्यानम्

अभयवरदहस्तं टङ्ककृष्णं दधानं
शशिधरमहिभूष्यं पीतवस्त्रं त्रिणेत्रम्।
विषहरणरूपं पिञ्चजाड्यञ्च पार्श्वम्
सितमहित गळाभं तं वृषारूढमीडे।।

316.चक्रप्रदानमूर्ति ध्यानम्

विष्णुर्थीशपुरो धृताञ्जलिगतं देवस्य पादाब्जयोः
पश्याक्षान् कुटिलाळकेन विलसत् माल्याम्बरैः कौस्तुभम्।
स्थित्वा रोरुणभावशोभिततनौ विष्णुक्ष पद्माज्वलां
टङ्कं कृष्णमृगं वराभययुतं चक्रप्रदानं भजे।।

317.विघ्नप्रसादमूर्ति ध्यानम्

विघ्नेशं रक्तवर्णं युगभुजसहितं श्यामवर्णं त्रिणेत्रं
इक्षुः कल्पलतासुतं न कबलं हस्ते अपूपायुतम्।
स्थित्वा देवस्य वामे स्तितपद्मनिशं शम्भुप्रियालिङ्गितं
देव्युक्तं सव्यपूपाथरकमलवरैः देवविघ्नप्रसादम्।।

318.विघ्नप्रसादमूर्ति ध्यानम्

अभयवरदहस्तं टङ्ककृष्णं दधानं शशिधरमहिभूष्यं पीतवस्त्रं त्रिणेत्रम्।
विषहर हररूपं चक्रबीजाख्यपार्श्वम्। सितमसितगळाभं तं वृषारूढमीडे।

319.भोगशक्ति ध्यानम्

श्यामळां द्विभुजां बालां अथक्कूर्मविलोचनाम्।
आपीनमण्डलाम्भोजां शुभ्रवस्त्रोत्तरीयकाम्।
शुद्धविद्यां महागौरीं शय्यापीठे तु कल्पयेत्।।

320.भोगशक्ति ध्यानम्

श्यामां द्विनेत्रां द्विभुजां त्रिभङ्गीं
सव्यापसन्यस्थित कुञ्चिताङ्घ्रिम्।
सव्योत्पलां नौमी सुरत्नभूषां
लम्बान्यहस्तां परमेश्वरीं ताम्।।

321.भोगशक्ति ध्यानम्

श्यामाभां चित्रवस्त्रां सरसिजवदनां शान्तकुम्भाङ्गभूष्याम्।
केशबद्धां त्रिभङ्गीं स्तनभरनमितां दीर्घपादां सुवक्राम्।
योगाङ्गीं भोगशक्तिं कुमुदकरतलां वामहस्तस्थिताब्जां
देवीं नित्यं प्रसन्नां विधिहरिविनुतां देवदेवीं नमामि।।

322.भोगशक्ति ध्यानम्

द्विभुजां चारुवदनां नेत्रद्वयसमन्विताम्।
करण्डमकुटोपेतां श्यामां नीलाळकान्विताम्।
निदम्बतटविस्तीर्णां प्रसार्ये ककरान्विताम्।
दक्षिणेब्जधरां देवीं सर्वाभरणभूषिताम्।।

323.स्कन्द ध्यानम्

हस्तद्वयपद्मधररत्ननिहदेहं
अक्षिद्वयरत्नमणिपद्मधरकर्णम्।
रत्नमयाभरणनूपुरसुपादं
सव्यमयमाभरणशङ्करकुमारम्।।

324.स्कन्द ध्यानम्

करधृतयुगपद्मं बालरूपं प्रशस्तं
समतलसमपादं विद्रुमाभं द्विनेत्रम्।
सकलवधसुशोभं कर्णताटङ्कयुग्मं
सकलभुवननाथं स्कन्दरूपं नमामि।।

325.वीरशक्ति ध्यानम्

श्यामां द्विनेत्रां द्विभुजां त्रिभङ्गीं
सव्यापसव्यस्थितकुञ्चिताङ्घ्रिम्।
सव्योत्पलं वा कटकां दधानं
लम्बोन्यहस्तां परमेश्वरी स्यात्।।

326.एकपादमूर्ति ध्यानम्

एकमूर्तिधरमेकपादकं शूलटङ्कवरदाभयान्वितम्।
कालकर्णमितिभूषणं लोकपूजितपदं भजाम्यहम्।।

327.एकपादमूर्ति ध्यानम्

एकाघ्रब्जं द्विपार्श्वे कटतटघटित स्वायुतं ब्रह्मविष्णुं
प्रोद्धस्ताञ्जलिं रुचिरकटितगे कुञ्चिताङ्घ्रिद्वयाढ्यम्।

रक्तं त्र्यक्षं दधानं वरदमभयदं टङ्कमेणं कराभ्यां
भास्वन्तं चन्द्रचूडं एकत्वसुरपतिं सत्रिमूर्तिम्।।

328.सुखासीनमूर्ति ध्यानम्

शान्तं पद्मासनस्थं दिनकसदृशं चन्द्रचूडं त्रिणेत्रं
सव्ये लंब्यङ्घ्रिपद्मं शयितवरभृतं वेदहस्तैर्दधानम्।
शूलं वह्न्यक्षमाले वरमभितयदायोग्यमस्येन् वामे
गौर्यायुक्तं महेशं स्फुरत्मरस्यात् सुखासीनरूपम्।।

329.दक्षिणामूर्ति ध्यानम्

वटविटपसमीपे भूमिभागे निषण्णं
सकलमुनिजनानां ज्ञानदातारमारात्।
स्फुरितकनकवीणां कुञ्चितं फालनेत्रं
गिरिवरशिखरस्थं दक्षिणामूर्तिमीडे।।

330.दक्षिणामूर्ति ध्यानम्

जान्वेकोर्धपादं च तमितरभस्मादेहनिथाया स्वर्ण
न्यश्रोथमूलं मुनिजनमभयं वेदमत्थ्यापयन्तम्।
व्याघ्रत्वत्कान्तवस्त्रं स्फटिकजपवटं ज्ञानरुद्राक्षमाला
अग्निं श्वेतं त्रिणेत्रं कपिलजटाधरं दक्षिणामूर्तिदेवम्।।

331.दक्षिणामूर्ति ध्यानम्

चतुर्भुजं त्रिणेत्रं स्यात् जटालम्बितशेखरम्।
पूर्वहस्तद्वये वापि दक्षिणे मुद्रिकान्वितम्।।

पुस्तकं वामहस्ते च परहस्तद्वयोरपि।
दक्षिणे लम्बितं पादं वामपादञ्च शायिनम्।।
व्याघ्रचर्माम्बरधरं सर्वाभरणभूषितम्।
कैलासपर्वते तस्मिन् वटवृक्षस्य मूलगम्।।
नत्वा जमदग्निश्च वसिष्ठ भृगुदक्षिणे।
भारद्वाजाऽगस्त्यो च भार्गवस्यापि दक्षिणे।।
व्याख्यानं रूपमेवन्तु दक्षिणामूर्तिदैवतम्।।

332.दक्षिणामूर्ति ध्यानम्

रुद्राक्षं वह्निहस्तं उडुपितसहितं भस्मनोद्धूलिताङ्गम्
उल्लासं पद्मपीठं हुतवहनं ऊर्ध्वगङ्गासहायम्।
ओङ्कारं मूलमन्त्रं मुनिजनसहितं वेदसारं शिवाख्यं
वन्दे कैलासनाथं सकलसुरपतिं दक्षिणामूर्तिदेवम्।।

333.दक्षिणामूर्ति ध्यानम्

हुतवहफणिकोशं ज्ञानमुद्रां कराग्रैः
दधतमजिनचेलं लम्बितं सव्यपादम्।
शयितमपरपादं भूतसंस्थं त्रिणेत्रं
गिरिवरशिखरस्थं दक्षिणामूर्तिमीडे।।

334.लिङ्गोद्भव ध्यानम्

लिङ्गमध्ये महादेवं जटाचन्द्रार्धधारिणम्।
चतुर्भुजं त्रिणेत्रं च मृगटङ्कवराभयम्।।

ऊर्ध्वे हंसरूपं स्यात् अधोरूपं वराहकम्।
एवं सदाशिवं ध्यायेत् लिङ्गोद्भवमहेश्वरम्।।

335.महासदाशिव ध्यानम्

प्रसन्नपञ्चविंशतिस्फुटाननं जटाधरं
सपञ्चसप्तदीक्षणम् कपोलकुण्डलान्वितम्।
शतार्थहस्तभूषितं वराभयान्वितं सितं
भुजङ्गभूषणं वरं भजे सदाशिवम्।।

336.उमामहेश्वर ध्यानम्

रक्तं त्रिणेत्रं शयितं विलम्बि वामे तु सव्ये पदमादधानम्।
वह्न्यक्षमाला वरशूलमीडे उमामहेशं गिरिजासमेतम्।।

337.उमेश ध्यानम्

पद्मस्थानसुखासनं त्रिणयनं शक्तिस्थ गौरीमुखा
लोकस्मेरमुखं जटामकुटयुक् खण्डेन्दु मौळीधरम् ।
वामालिङ्गितवाममन्यकरयाष्टकं मृगं बिभ्रतं
श्लीष्यत्सव्यकराभयप्रदं उमायुतं महेशं परम्।।

338.भुजङ्गललित ध्यानम्

एकास्यं त्रिविलोचनं युगभुजं वामे तु दुर्धूरकं
चन्द्रं वक्रशिवप्रसारितकरेण्यूर्ध्वं पदं कुञ्चितम्।
सव्ये स्वस्तिक कुण्डले डमरुकं गङ्गाभये बिभ्रतं
वन्दे कीर्णजटं नटेशमनिशमपस्मारदेहस्थितम्।।

339.भुजङ्गत्रासमूर्ति ध्यानम्

दक्षे डिण्डिभुजयुक्तमपरे खण्डञ्च सूचीकरं
बिभ्राणं करपङ्कजे समपदं पीठेस्थितं चञ्चलम्।
सम्यक् बन्धकपर्दिनं त्रिणयनं गङ्गेन्दुचूडं शिवं
वन्दे त्रासभुजं ताण्डवपरं शार्दूलचर्माम्बरम्।।

340.सन्ध्यानृत्तमूर्ति ध्यानम्

एकं पादमुदस्य कुञ्चितपदं स्वान्नकभूतस्थितो
व्यर्तासने भुजं प्रसारर्य ममरुं व्यावर्तनम्।
अम्बावक्त्रसरोरुहेन सदृशासानन्दमन्तस्मितं
भावस्संसतिताण्डवप्रकटयन् नाट्ये नटः पातु नः।।

341.शार्दूलविग्रह ध्यानम्

पाण्डुपाण्डरत्रिणयनं वृत्ताळकालं कृतं
शार्दूलास्य विदहरि हस्तयुगलं सव्ये धृताब्जं करैः।
सूची मुष्टिकरन्तु दक्षचरणे नाक्रान्त तत् कुञ्जरं
वन्दे कुञ्चितमञ्चपाददधतं शार्दूलहारीश्वरः।।

342.पाशुपत ध्यानम्

वृत्ताळकं रक्ततनुं त्रिणेत्रं शूलाभयं वार्जञ्च वामे ।
बिभ्राणमेतं शशिखण्डचूडं वामेकरे पाशुपतास्त्र धृक्कृतम्।।

343.सिंहघ्नमूर्ति ध्यानम्

सिंहास्यं सूर्यचन्द्रानलनयनधरं ज्वालकेशं च दंष्ट्रं
पक्षद्वन्द्वेनयुक्तं सुरवरविनुतं मर्दितं वेदहस्तम्।

पादाक्रान्तेन सिंहेर्हुरसिविथलत् पादपद्म द्वयाड्यं
नीलं शूलं कपालं दधतमपितनो नारसिंहघ्नदेवम्।।

344.लकुळेश्वर ध्यानम्

शोणाभं डमरुञ्च शूलमपरे वामे भये कुण्डिकाम्
बिभ्राणं सितभस्मराजिततनुं पिङ्गोर्ध्वकेशावृतम्।
त्र्यक्षं निगलं महोरगधरं हारादिभूषोज्वलम्
ध्यामो लकुलीश्वरं सुरपतिं पद्मासनस्थावृदि।।

345.आपतोद्धरण ध्यानम्

उद्यत्भास्करसन्निभं त्रिणयनं पुल्ल्योल्यसत् कुन्दलं
चालं दण्डकपालफणियुगलं ताटङ्ककर्णोद्वया।
हर्यक्षाजिन कञ्चुकं विवसनं जबन्तकान्तत्वणत्
घण्टादामकृतोपवीतमनिशं नौम्यापदुद्धारणम्।।

346.वटुकनाथ ध्यानम्

करकलितकपाली कुण्डलीदण्डपाणिः
तरुणतिमिरनीलो व्यालयज्ञोपवीतिः।
क्रतुसमयसपर्याविघ्नविध्वंसहेतुः
जयतु वटुकनाथः सिद्धिदस्सादकानाम्।।

347.क्षेत्रपाल ध्यानम्

रक्तज्वाल जटाधरं त्रिणयनं दंष्ट्राकरालाननं
हस्तैः पाशकपालशूलडमरुं दन्दितो विकृतम्।

नग्नं नागविभूषणं श्वनयुतं कृष्णं सुवृत्तेक्षणं
घण्टादामसमेतजङ्घममलं क्षेत्रञ्च पालं भजे।।

348.अघोरास्त्र ध्यानम्

सजलघनसमाभं भीषणं भीमदंष्ट्रं
भुजगधरमघोरं रक्तवस्त्राङ्गरागम्।
परशुडमरुखड्गं खेटकं चापबाणं
त्रिशिखनरकपालं बिभ्रतं भावयामि।।

349.अघोरास्त्र ध्यानम्

रक्तवस्त्रपरीधानं भिन्नाञ्जनसमप्रभम्।
भुजाष्टकसंयुक्तं ऊर्ध्वकेशं सुदंष्ट्रिणम्।।
स्पष्टाष्टाथरोष्टञ्च दीप्ताग्नि समलोचनम्।
किङ्किणीमालयाभूष्यं पादनूपुरशोभितम्।।
शुक्लयज्ञोपवीतञ्च रक्तवस्त्रोत्तरीयकम्।
लूतावृश्चिकसञ्छिन्नं घण्टाभरणभूषितम्।।
मेखलोदरथञ्चैव वन्दे शिरसिबन्धनम्।
कर्णयोरुभयोश्चैव हस्तयोरुभयस्तथा।।
बाहुपादौ ततः पार्श्वे नाभिभूष चतुर्दशा।
पङ्कजासनमध्यस्थं त्रिणेत्रं रौद्ररूपिणम्।।
सप्तायुतं समायुक्तं सर्वाभरणभूषितम्।
शूलं डमरु वेतालं खड्गखेटकपालदृत।।
एवं घण्टा समायुक्तं सव्यवामपुरस्थितम्।

सर्वशत्रुक्षयकरं दर्शोमक्रमरूपिणम्।।
एवं रुपधरं देवं अघोरास्त्रादिदैवतम्।।

350.अघोर ध्यानम्

वेतालखड्गडमरुं त्रिशूलं दक्षे वहन्तं मतिकृष्णमृग्यम्।
कपालखेटान्वित वामघण्टं यानं सदाऽघोरमहं भजे।।

351.दक्षयज्ञहर ध्यानम्

वीरं कोपजवीरभद्रविहितं रूपं वहन्तं दृढं
सव्ये नाङ्घ्रिवरेण दक्षपुरतोर्विन्यस्त भूमिं ततः।
पश्चाद्वामपदाम्बुजाङ्घ्रिलसितांगुष्ठां स्थितं भावये
खड्गेनाहतदक्षराजशिरसं दक्षाध्वरध्वंसकम्।।

352.अश्वारूढ ध्यानम्

रक्तं षोडशवार्षिकाकृतिधरं रक्तो ज्वलत्कुण्डलं
रक्ताबद्धकिरीटकं शशिधरं हारादिभूषान्वितम्।
बाणश्चापहयाधिरूढममलं सव्ये तु पत्रान्वितम्।
वामे रज्जुधरं वराम्बरधरं अश्वादिरूढं भजे।।

353.गजान्तिक ध्यानम्

शान्तं प्रसन्नं शशिधरमकुटं कुण्डलोद्भासिकन्धं
सव्ये खट्वाङ्गसक्तां सतलषितरतो लम्बिबाहुं च हस्तम्।
बालाकारं सुशोभं तरुणविनिभं श्रीघ्रमागच्छतारा
हस्तिन्द्रेणागुह्यात् कबलितवपुषं हस्तिदूरस्तमीडे।।

354.ब्रह्म ध्यानम्

पीताभं चतुराननं श्रुतिभुजं दिव्यं जटाशेखरं
द्विनेत्रं कमलाभयान्वितकरं गण्ड्यक्षमालाधरम्।
केयूरादिविभूषणं सुरवरं पीताम्बरालङ्कृतं
हंसारूढमजसृ सृष्टिसहितं ब्रह्माणमीशं भजे।।

355.विष्णु ध्यानम्

श्यामाभां च द्विलोचनं श्रुतिकरं पीताम्बरालङ्कृतं
सव्ये चक्रमभीतिमर्भकरयोः शङ्खं गदा बिभ्रतम्।
वामे पद्मसुखासनं कमलयोयुक्तं स्थितेः कारणं
राजत्कुण्डलरत्नदीप्तमकुटं श्रीविष्णुदेवं भजे।।

356.रुद्रमूर्ति ध्यानम्

त्रिशिरसमरुणाभं नागभूषं कपर्दादि
ज्वलितमकुटमीशं चन्द्रमौलिं सुरेशम्।
त्रिशिखमभयमब्जं साक्षिमालां कराब्जैः
दधतमनुदिनन्तं रुद्रदेहं भजेऽहम्।।

357.गौरीवरप्रदानमूर्ति ध्यानम्

रक्तं त्रिणेत्रविलसन्मुखमिन्दुचूडं
टङ्कं मृगं त्रिशिखमादधतं त्रिहस्तैः।
सव्येन भस्मविधृतञ्जलयेत् गौर्यै
गौरीवरप्रदमहं सततं भजामि।।

358.गरुडदाह ध्यानम्

नागं शूलवराभयञ्च दधतं नागोपवीतान्वितम्
ताक्षारूढमुखमरैः मुनिवरैः सिद्ध्यादिभिस्सेवितम्।
हस्ताभ्यां क्रमदण्डजाथिपगरुददाहिस्वाफालेक्षणं
वामे शक्तियुतं स्थितासनगतं तार्क्षगदां भजे।।

359.कूर्मसंहारमूर्ति ध्यानम्

अवतु धवळाननस्कृण चन्द्रचूड स्तिथसमपदपद्मं टङ्ककृष्णं दधानम्।
अभयमपि कराग्रैः कूर्मपृष्ठस्थिवामेन हरियुतवामे कूर्मसंहारदेवः।।

360.मत्स्यहारि ध्यानम्

त्रिक्षोनीलाभकायो भुजगचयथरश्चन्द्ररेखावतंसः
खड्गं खेटञ्च घण्टापरशुमपिदधत् सव्यवामेश्च हस्तैः।
खड्गेनाहृत्समत्स्यं निशितपरशुना हृत्यतल्योचने द्वे
बिभ्राणं पातकनोहत भव चयं मत्स्यसंहारदेवम्।।

361.वराहारि ध्यानम्

हेमाभं ज्वालकेशं कुटिलनयनकं भैरवाकारदेहं
वामे पाशञ्च शूलं डमरुकमपरे भिण्डिपालञ्च हस्तैः।
शूलेनाहृत्यकोलं निजभुजकमले नोद्धृतं तद्विषाणं
सेवत्सेधारयन्तं निकटहरहरीं वराहस्तमीडे।।

362.प्रार्थनामूर्ति ध्यानम्

कुन्दं त्रिविलोचनं शशिधरो वामे तु टङ्कं दधत्
रक्षाबन्धजटाशृजज हतनयो वामे तु चण्डां प्रियम्।
आलिङ्ग्येककरेण तच्चिबुकतोर्नस्तार्नपाणिं प्रिये
जल्पर्नोयन्मथनान्वितोवत् शिवो नः प्रार्थनानुग्रहः।।

363.रक्तभिक्षाप्रदानमूर्ति ध्यानम्

नाट्याकारन्तं सर्वे फणिपतिदधतं वामहस्ते तु पाशं
वामे भिक्षाकपाले वरकरकमलोन्तमध्यं त्रिशूलम्।
विष्णु प्रार्ता ममसृतबहुळलसत रक्ताधारावहन्तं
वन्दे देवं महेशं मुनिवरविनुतं रक्तभिक्षां दधानम्।।

364.शिष्यभाव ध्यानम्

कुन्दाभं मन्दहासं शशिधरमकुटं कुण्डलोद्भासिगण्डं
सव्ये नास्यं विधाय वरकरकमलं न्यास्यवक्ष्यस्थले च।
टङ्कं कृष्णं दधानं गुरुगुहपुरतो यस्थले नम्रमूर्तिं
तत्वाद्यो मध्यतत्वं सहयुजतगिरिजं शिष्यभावञ्च मीडे।।

365.वृषभ ध्यानम्

श्रुतिपदमनलशृङ्गं भास्करेन्दु द्विनेत्रं
हरशिखविधशीर्षं चाश्वनी कर्णरूपम्।
नवमणिकृतमाला नूपुरं दिव्यरत्नं
स्फटिकधवळगात्रं उक्षराजं नमामि।।

366.वृषभशक्ति ध्यानम्

अञ्जनप्रभामनललोचनत्रयां
कर्पूरचन्द्रधरां कमलासनस्थाम्।
कस्तूरिचन्दनहिमजलकुङ्कुमपङ्कशोभां
शक्तिं वृषांजन देवि रुपां ।।

367.अन्नलिङ्ग ध्यानम्

शुक्लवस्त्रधरं देवं शुक्लमाल्याञ्चभूषितम्।
सर्वाभरण संयुक्तं चतुर्दोर्भिस्समन्वितम्।।
हस्ते माल्यधरं दक्षे वामे नीलोत्पलं तथा।
हरिणं परशुञ्चोर्ध्वे धारयन्तं भुजद्वये।।
अन्नलिङ्गस्वरूपन्तु सर्वकामफलप्रदम्।।

368.श्रीबलिनायक ध्यानम्

अरुणमणिनिभाङ्गं चन्द्रचूडं त्रिणेत्रं
हरिणपरशुधारिं गौरीमालिङ्गवामे।
अभयवरदयुक्तं हारकेयूरभूष्यं
सितकमलदळाग्रे श्रीबलिनाथस्वरूपम्।।

369.बलिशक्ति ध्यानम्

चतुर्भुजां त्रिणेत्राञ्च सर्वावयवसुन्दरीम्।
श्यामाभां शङ्खचक्रञ्च वरदाभयधारिणीम्।।
श्रीबलिं वीरशक्तिञ्च पूजयेत्तु यथाविधिः।।

370.सरस्वती ध्यानम्

चतुर्भुजां महादेवीं वाणीं सर्वाङ्गसुन्दरीम्।
श्वेतमाल्याम्बरधरां श्वेतगन्धानुलेपनाम्।।
प्रणवासनसंरूढां तदर्धत्वेन निश्चिताम्।
सितेन दर्पणाभेन वस्त्रेण परिभूषिताम्।।
शब्दब्रह्मादिकां देवीं शरश्चन्द्रनिभाननाम्।
अङ्कुशं चाक्षसूत्रञ्च पाशं वीणाञ्च धारिणीम्।।
मुक्ताहारसमायुक्तां देवीं ध्यायेच्चतुर्भुजाम्।
कर्त्रा (कत्राच्च) च जगद्वन्द्यै सर्वलोकैकपूजिते।।
मया कृतामिमां पूजां गृहाण जगदीश्वरी।।

371.सरस्वती ध्यानम्

चतुर्भुजां द्विनेत्रां च श्वेतवर्णसमन्विताम्।
अक्षमालाञ्च सव्ये तु पुस्तकं वामहस्तके।।
अभयं दक्षिणे हस्ते गण्डिकां वामपार्श्वके।
पद्मासनसमायुक्तां सर्वाभरणभूषिताम्।।

372.ज्ञानसंबन्धमूर्ति ध्यानम्

श्वेताभं मणिकुन्तलं प(पु)रशिवं सौम्यं प्रसन्नाननं
सव्ये तर्जनीदीर्घया शिवदृशं वामे पयःपात्रकम्।
निर्वाणं शिशुमम्बुजस्थितपदं बद्ध प्रपिध्वंसकं
नानाद्राविडसत्कविं शुभकरं ज्ञानसंबन्धं भजे।।

373.ज्ञानसंबन्धमूर्ति ध्यानम्

द्विभुजं श्यामवर्णन्तु जटामकुटमण्डितम्।
ताळद्वयकरं चैव बालरूपेण निर्मितम्।
किङ्किणी मेखलायुक्तं कर्णताटङ्कधारिणम्।
सव्ये पादस्थितश्चैव अपरन्तु कुञ्चितम्।।

374.वागीश ध्यानम्

रुद्राक्षं शिवपादपद्म भजोत्तमाङ्गं
सौम्यानन‌ं शिव(शूल) चिह्नाञ्चित कर्णभूष्यम्।
हस्ताञ्जलिं तृणहरायुत वामबाहुं
पद्मे स्थितं कविवाक्पति मानतोऽस्मि।।

375.वागीश ध्यानम्

एकवक्त्रं द्विनेत्रं च द्विभुजं अञ्जलीकृतम्।
पूर्वे शिखा समायुक्तं वामहस्तेन चेतकम्।।
रुद्राक्षधारिणं चैव भस्मोद्धूलितविग्रहम्।।

376.माणिक्कवाचक ध्यानम्

द्वेकुन्दळीं मणिशिरोरुहचारुवक्त्रं
ज्ञानाख्यमुद्राङ्क पुस्तक सव्यवामम्।
मालाक्षवक्षमुपवीतधरं स्थिताङ्घ्रिं
माणिक्कवाचकसुभक्तमहं भजामि।।

377.माणिक्कवाचक ध्यानम्

द्विनेत्रं द्विभुजं शान्तं श्वेतवस्त्रविभूषितम्।
जटाधारैकवक्त्रञ्च पुस्तकं वामहस्तके।।
दक्षिणे ज्ञानमुद्राञ्च अक्षमालान्तु धारिणम्।
शिवध्यानस्वरूपन्तु सर्वाङ्गं भस्मधारिणम्।।

378.सुन्दरमूर्ति ध्यानम्

पाण्डी शिवं सुमुखमाखरकर्णभूष्यं
हेमाभवे त्रिकरयोगिनि सव्यपार्श्वम्।
वामेज्ञ सूत्रमुदभोगिन्निरंस बाहुं
ध्यायेत्रिभङ्गीं शिवसौन्दरनृत्तताङ्घ्रिम्।।

379.सुन्दरमूर्ति ध्यानम्

भक्तं सव्यकरे क्षिप्तवेत्रं योगोर्ध्ववेष्टितम्।
सुन्दरं सुमुखं स्वच्छं दिव्यालङ्कारभूषितम्।।
शैवद्विजासूनुं च परया सहितं सदा।
शिवश्चाया समुदितं पूर्वरूपं भजाम्यऽहम्।।

380.सुन्दरमूर्ति ध्यानम्

एकवक्त्रं द्विनेत्रं च त्रिभङ्गीं कुञ्चिताङ्घ्रिकम्।
केशबद्धसमायुक्तं सृणिहस्तञ्च दक्षिणे।।
राजाङ्गं वामहस्तञ्च सर्वाभरणशोभितम्।
हेमवस्त्रधरं देवं हेमयज्ञोपवीतकम्।।

381.चण्डेश्वर ध्यानम्

श्रीकुन्दळीमकुटदृक्यद्वयसौम्यवक्त्रं
कर्णद्वये मकरकुण्डलयज्ञसूत्रम्।
हस्ताञ्जलिं विजयसव्यसुबाहुटङ्कं च
चण्डेश्वरं स्थिमताम्बुजमानतोऽस्मि।।

382.रेणुका ध्यानम्

अरुणमणिनिभाङ्गं अग्निकेशं करण्डं
डमरुकधरशूलं खड्गहस्तं कपालम्।
अनलनयननागं वीरसिंहासनस्तं
अखिलभुवनमाता रेणुकादेवीमीडे।।

383.रेणुका ध्यानम्

देवीं दिव्यशिरप्रसन्नवदनां दिव्याङ्गरागोज्वलाम्
दिव्यैराभरणैः किरीटमकुटां दिव्याम्बरालङ्कृताम्।
दिव्याकाशतनुं दिवाकररुचिं देवादि देवाढ्यहं
दिव्यं सुन्दरकारिणीं शुभकरीं अम्बां भजे रेणुकाम्।।

384.पळ्ळियरै शोक्कर् ध्यानम्

चतुर्भुजं त्रिणेत्रं च जटामकुटमण्डितम्।
हरिणी टङ्कसंयुक्तं अभयं वरदान्वितम्।।
शुक्लयज्ञोपवीतश्च शुक्लमाल्या विभूषितम्।
पद्मासनसमायुक्तं चिबिकायां नियोजयेत्।
अर्धयामेश्वरं देवं शुद्धगेहे प्रवेशयेत्।।

385. पल्लियरै अम्बाल् ध्यानम्

श्यामनिभदृक्य द्वयकरण्डमकुटं स्यात्
वामकरपीठसहितोत्पल सुसव्याम्।
वामपद सव्यपद लम्बितसुशय्यां
चारूपवदनाम्बुज मनोन्मनी स्वरूपम्।।

386.पल्लियरै शोक्कर् ध्यानम्

पादुकं परमं पद्मं निर्विकल्पं निरामयम्।
परशब्दमिदं प्रोक्तं आकृतञ्च परात्परम्।
डोलके शुद्धविद्यन्तं ईश्वरं पादुकाकृतिम्।।

387.पल्लियरै अम्बाल् ध्यानम्

वामाङ्घ्रिलम्बितं पादं वनजासनस्थां
दक्षाङ्घ्रि निद्रितपदां द्विभुजां त्रिणेत्राम्।
पीठे निवेशितकरां शतपत्रहस्तां
शय्याङ्गनामीश्वर वामसंस्थाम्।।

388.विष्णुदुर्गादेवी ध्यानम्

श्यामवर्णां द्विनेत्रां च चतुर्भुजसमन्विताम्।
पीताम्बरधरां देवीं सर्वाभरणभूषिताम्।
अभयं शङ्खचक्रञ्च ऊरुहस्तं ततोपरि।
विष्णुदुर्गामिति ध्यायेत् महिषोपरि संस्थिताम्।।

389.विष्णुदुर्गा देवी ध्यानम्

सुवक्त्रां नीलकेशाञ्च नीलोत्पलदळाकृतिम्।
सुस्तनीं चारुवदनां सर्वाभरणभूषिताम्।
दक्षिणे स्वस्तिकं पादं वामपादञ्च कुञ्चितम्।
शङ्खं चक्रञ्च दधतीं दक्षिणे नाभयप्रदाम्।।

390.शास्तृ ध्यानम्

ध्याये।हं हरिहरपुत्रनामधेयं
सूक्ष्माङ्गं भुजयुगळ त्रिणेत्रम्।
ऐरावतस्य कनकोत्तमभूषणाङ्गं
शिक्षारिं भवभयहरं सुकेशम्।।

391.शास्तृ ध्यानम्

वन्दे रुद्रकुमारमिन्दुवदनं विष्णोः करादुद्भवम्
कन्दर्पातुलसुन्दरं परिलसत् वक्त्राग्रवेत्रं शुभम्।
मन्दस्मेरमुखारविन्दलसितं योगाङ्गवेष्ट्यान्वितं
वामे दक्षिणपूर्णपुष्कलयुतं शास्तारमाद्यं भजे।।

392.शास्तृ ध्यानम्

एकवक्त्रं द्विनेत्रञ्च द्विभुजं बालरूपकम्।
श्यामवर्णं सुखासीनं योगपम्कियान्वितम्।।
भृङ्गाभं कुटिलामोदमनोज्ञ मृदुकुन्दलम्।

रक्तवस्त्रपरीधानं लम्बदक्षपदाम्बुजम्।।

समुद्धृतसमाकुञ्च्य द्वामपादसरोरुहम्।
कशां दक्षिणे हस्तेन धारयन्तं महाबलम्।।

वामजानूपरिन्यस्त प्रसारितभुजान्तरम्।
कार्तस्वरसमाक्लृप्त हारकेयूरकुण्डलम्।।

शुक्लयज्ञोपवीताङ्गं नागाभरणभूषितम्।
नमत्भक्तजनाभीष्ट फलदानकुतूहलम्।।

पूर्णापुष्कळनाम्निभ्यां देवीभ्यां सोभिपार्श्वकम्।
शास्तारं सर्वलोकानां भजे हरिहरात्मजम्।।

393. योगशास्तृ ध्यानम्

रक्तवर्ण द्विरष्टहस्तके दण्डहस्तगजाङ्कुशपूर्वके।
डमरुं चम्रु वरदक्षिणे करे पाशबाणहसिसूचितोमरम्।।
खड्गचापगदाङ्कुश केटके अग्निशक्तिपरहस्तवामके
वामदक्षिणपुष्कळपूर्णयो योगशास्तृ भजामेरुके।।

394.वीरशास्तृ ध्यानम्

वीरशास्तृ वरवाससुन्दरे कृष्णवर्णदेशहस्तवज्रकं
परशुबाणहसिवेत्र दण्डके चापबाणगदपाशकेटके
केशबन्धजटाहृदि वर्तुलं सर्वभूषणसुपर्णसुकुन्दलं
वामदक्षिणपुष्कलपूर्णयो योगवेष्टि सुखासनोस्थितं भजे।।

395.नगर शास्तृ ध्यानम्

नगरशास्तृभुजाष्टकसंयुतं श्यामळाङ्ग द्विनेत्रसुयौवनम्
खड्गसूचिशिखिदण्डबाणके चापकेटगदाङ्कुशधारिणम्।
वामदक्षिणे पुष्कलपूर्णयोर्योगवेष्टितसुकुञ्चितसोस्थितं
मन्दहासपरिपूर्णवक्त्रकं भोगशास्तनगरं भजाम्यऽहम्।।

396.पट्टण शास्तृ ध्यानम्

पीतवर्णसुयौवनां पट्टणे भुजवतुष्क समन्वितशान्तकं
खड्गहस्तशिखिदण्डसव्यके।
केटहस्तगजाङ्कुश वामके वामदक्षिणपुष्कळपूर्णयो
उदरबन्धन कुन्दल कर्णयो कटपूरिजटावृत वर्तुळं पम्णेषु सुखासन संस्थितम्।।

397. शास्तृ ध्यानम

श्यामळाङ्ग द्विभुजस्सुयौवनं सव्यवामशिखिदण्डपाशके
सिंहपीठसुखसंस्थितम्।
वामदक्षिणपुष्कळपूर्णयो केशबन्धजटावृत वर्तुळं ग्रामवेषपुरवासतन्तु पाशान्तमूर्ति हरिहरपुत्रकम्।।

398. शास्तृ ध्यानम

श्यामलाङ्गस्सुकोमळसुन्दरं वेत्रदण्डप्रसार्यकरद्वये।
वाममुद्रितकुञ्चितसुखासनं दक्षपादशयनन्तु लम्बितम्।
कटिबद्धजटामकुटा तथात्रळकवृत्त विकीर्ण जटाधरं
दक्षिणोत्तरपुष्कळपूर्णयो योगवेष्टित पद्मसुखासनम्।।

399. शास्तृ ध्यानम

सौवर्णश्यामकुन्दलये वनञ्च वेष्टितं
जा‌न कर्भसंयुतन्तु प्रसार्य।
वामकुञ्चितं दक्षवामशैवलम्बवेत्र दण्ड दक्षिणे
कोलाङ्गयेश्चनञ्च पूर्णपुष्कलद्वये कुन्द संस्तथा।।

CENTRE FOR SHAIVA STUDIES
Puducherry

400. शास्तृ ध्यानम

श्यामलाङ्ग द्विभुज द्विनेत्रकं सव्यहस्तथर ज्ञानमुद्रया
वामपुस्तककुण्डलसंयुतं क्रूरदंष्ट्रमवृत्तजटाधरं
योगपम्मुपवीतसंयुतं छन्नवीरसमासमप्रीतभूषणे
पादनूपुरकिङ्किणीभूषितं राजद्वारद्वयपालकसंस्थितम्।।

401. शास्तृ ध्यानम

एकवक्त्रं द्विनयनं कर्णकुण्डलमण्डितम्।
किरीटमकुटोपेतं केशबन्धसमन्वितम्।
भुजद्वयसमायुक्तं वेत्रदण्डधरान्वितम्।
वामहस्तञ्च ऊरुञ्च उत्पलञ्च धरान्वितम्।
स्वर्णवर्णसमायुक्तं रत्नताटङ्कभूषितम्।
श्वेतयज्ञोपवीतञ्च चने वीरसनसमन्वितम्।।(छन्न)

402. शास्तृ ध्यानम

दक्षिणे वीरटङ्कञ्च खड्गखेटसमन्वितम्।
वामे तु वीरमार्ताण्डं श्वेतश्चत्रसमन्वितम्।।

सर्वाभरणसंयुक्तं पादनूपुरसंयुतम्।
पङ्कजासनसंयुक्तं सर्वालङ्कारशोभितम्।।
शान्तरूपस्थितं देवं सर्वलक्षणशोभितम्।
ग्रामरक्षाकरं देवं बालशास्तां प्रपूजयेत्।।

403. शास्तृ ध्यानम

आश्यामकोमलविशालतनुं विचित्रवासोवसानमरुणोत्पल वामहस्तम्।
उत्तुङ्गरत्नमकुटं कुटिलाग्रकेशं शास्तारमिष्टवरदं शरणं प्रपद्ये।।

404. शास्तृ ध्यानम

श्यामवर्ण यौवनञ्च भासमानकुन्दलं
कुञ्चितोर्ध्व वाजान् डेलबाहुवेष्टितम्।
सव्यऊरुलम्बजङ्घवेत्र दण्डदक्षिणपूर्णसर्वपुष्कलञ्च वामशास्तारं भजेत्।।

405. शास्तृ ध्यानम

मरकतचलमेवकविग्रहं मणिमयग्नतो ज्वलवक्षसं
हरिहरात्मज बालथ उत्भूतं मयमवाहन मवारुणकन्तिकम्।।

406. शास्तृ ध्यानम

कनककमलपीठं चासनं योगवेष्टितं
करतलधृतडोलं दक्षिणे वेत्रदण्डम्।
सरसिजसुकवक्त्रं शरत्नकुन्तलं
श्यामवर्णस्पुरतु कनकपूर्णपुष्कले
उभयपार्श्वे हरिहरसुतमीडे रौद्रमीडे।।

407. शास्तृ ध्यानम

हस्ते पुस्तकमक्षसूत्रवलयं व्याख्यानमुद्रान्वितम्।
विभ्रकमलप्रवाळ रुचिरैस्वन्यभूषाविलेवितम्।।
मुक्ताभं मणिभूषणे विलसत् व्याख्यानपीठस्थितं
वासाद्यैसन पुनवै परिवृतं शास्तारमन्दं यजेत्।।

408. शास्तृ ध्यानम

इन्दुकान्तधवलं सात्मीकसौन्दर्यनयनं गुहं
वीणापुस्तकमक्षसूत्रवलयं व्याख्यानमुद्रां करैः।
जम्बूमूलतलैषु मेरुशिखरे माणिक्यसिंहासने
स्कन्धारूढकविश्वविमोहनं हृदि महाशास्तारमाध्यं भजेत्।।

409. शास्तृ ध्यानम

कल्हारोत्पल नीलकुन्दलधरं कालं मृतं श्यामलं
कल्पूराकलिताभिरामवपुषं कुन्देन्दु बिम्बाननम्।
श्रीचण्डाङ्कुशपाशशूलविलसत् माणिक्यसिंहासनं
राज्यं त्रिविश्वविमोहनं हृदि महाशास्तारमध्यं भजेत्।।

410. शास्तृ ध्यानम

द्विभुजश्च द्विनेत्रश्च श्यामाभं बालरूपकम्।
नागकोमळविस्तीर्णं नानाभरणभूषितम्।।
रक्तवस्त्रधरं देवं रक्तपुष्पोपशोभितम्।
बालेन्दु मौलिसंयुक्तं मदद्विदेश दक्षिणे।

पाशाङ्कुशधरं चैव पद्मं डोलकरान्वितम्।
स्वर्णयज्ञोपवीतञ्च योगपट्टिकधारिणम्।
हारकेयूरमकुटं कटिसूत्रे तु बन्धने।
शङ्खं वै कन्नूपेत्सेधं मेखला लम्बितं भवेत्।।

411.काली ध्यानम्

श्यामाभां रक्तवस्त्रां ज्वलितशिखयुतां अष्टधानिं कराभ्यां
शूलं वेतालखड्गं डमरुकसहितं वामहस्ते कपालम्।
अन्यत् घण्टोर्ध्वखेटां हलमुसलयुतां रौद्रिभावां त्रिणेत्रां
चामुण्डीं रूपमेतत् त्रिभुवनशिखरीं भद्रकालीं नमस्ते।।

412.काली ध्यानम्

एकवक्त्रां त्रिणयनां ऊर्ध्वकेशसमन्विताम्।
श्यामवर्णसमायुक्तां चतुर्दोर्दण्डमण्डिताम्।।
प्रसन्नवदनां देवीं दुकूलवसनान्विताम्।
शूलं डमरुकञ्चैव कपालं पाशमेव च।
बिभ्रतीं फुल्यनयनां नानाभरणभूषिताम्।
एवञ्च ध्यानमेवोक्तं भद्रकाळीमहं भजे।।

413.काली ध्यानम्

खड्गं कपालं डमरुं त्रिशूलं सर्पाधृतिं चन्द्रकलावतंसाम्।
पिञ्गोर्ध्वकेशां धृतभीमदंष्ट्रां पूर्वां भजे मम भद्रकालीम्।।

414.सूर्य ध्यानम्

भानुं कुङ्कुमभास्वरं द्विनयनं एकाननं पद्मकम्।
सव्ये तोमरसाभये च दधतं वामे वराब्जे करे।।
युक्तं प्रत्युषया च वामगतया सव्यस्थया चोषया
ध्यायेद्धृत्त सुगन्धमाल्यवसनं स्वपूज्यप्रभा मण्डलम्।।

415.चन्द्र ध्यानम्

श्वेतवर्णं द्विनेत्रं च द्विपादमेकवक्त्रकम्।
कर्णकुण्डलसंयुक्तं श्वेतपद्मोपरिस्थितम्।।
द्विभुजं कुमुदाभञ्च श्वेतवस्त्रेण वेष्टयेत्।
सर्वैराभरणैर्भूष्यैर्मुक्ताभरणभूषितैः।।
किरीटमकुटोपेतं प्रभामण्डलमण्डितम्।
कृत्तिकां दक्षिणेभागे रोहिणीं वामपार्श्वके।।
दुकूलवसनोपेतं सर्वाभरणभूषितम्।
एवं ध्यात्वा विशेषेण ध्यानमन्त्रेण पूजयेत्।।

416.चन्द्र ध्यानम्

श्वेताम्बरे श्वेतविभूषण श्वेतद्विर्तिदण्डधरो द्विबाहुः।
चन्द्रो कृतात्मा वरदः किरीटी श्रेयांसि मह्यं विदधातु देवः।।

417.अङ्गारक ध्यानम्

रक्ताम्बरो रक्तवपुः किरीटि चतुर्भुजो मेषगमो गदां हृत्।
धरासुतश्शक्तिधरश्च शूली सदा मस्याद्विरदः प्रशान्तः।।

418.बुध ध्यानम्

पीताम्बरः पीतवपुः किरीटी चतुर्भुजो सोमसुतः प्रशान्तः।
तथा दण्डकमलश्च तथाक्षसूत्रवलयं वरदोस्तु मह्यः।।

419.गुरु ध्यानम्

पीताम्बरो पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशान्तः।
तथादिदण्डश्च कमलश्च तथाक्षसूत्रवलयं वरदोऽस्तु मह्यः।।

420.शुक्र ध्यानम्

श्वेताम्बरो श्वेतवपुः किरीटी
चतुर्भुजो दैत्यगुरुः प्रशान्तः।
तथादिदण्डश्च शुभ्रा वरदोऽस्तु मह्यः।।

421.शनैश्चर ध्यानम्

द्वक्षं चतुर्भुजं कृष्णं दक्षिणे वरदं शरम्।
वामहस्ते धनुष्पाशं ध्यायेद्देवं शनैश्चरम्।।

422.शनैश्चर ध्यानम्

शूलं बाणं सव्यभागे वहन्तं वामे चापं वरदकञ्चादधानम्।
कृद्धारूढं कृष्णवर्णं त्रिणेत्रं वन्दे सूर्यसुतं नमामि।।

423.राहु ध्यानम्

नीलाम्बरो नीलवपुः कीरीटी कराळवक्त्र करवालशूली।
चतुर्भुजश्चर्मधरश्च बाहु सिंहाधिरूढोस्तु मह्यम्।।

424.केतु ध्यानम्

धूम्रो द्विबाहु वरदो गदाहृत् गृद्धासनस्थो विकृताननश्च।
किरीटी केयूरविभूषिताङ्गः स चस्समे केतुगुण प्रशान्तः।।

425.डिण्डि ध्यानम्

डिण्डिनं सव्यपार्श्वे तु मुण्डिनं वामपार्श्वके।
रक्तवर्णं द्विनेत्रञ्च नागयज्ञोपवीतिनम्।।
भीमरूपं सुदंष्ट्रं च द्विभुजम् एकवक्त्रकम्।
विजयं हस्तसंयुक्तं दण्डायुतसमन्वितम्।।
सव्यस्थितं द्वारपालं डिण्डिनञ्च स्वरूपकम्।।

426.मुण्डि ध्यानम्

मुण्डिनं कृष्णवर्णन्तु द्विभुजञ्च द्विनेत्रकम्।
दण्डायुतसमायुक्तं नागाभरणभूषितम्।।
वितस्तिहस्तसमायुक्तं मुण्डिनञ्च स्वरूपकम्।।

427.पादुका ध्यानम्

डाडिमीकुसुमप्रख्यं ऊर्ध्वकेशं त्रिणेत्रकम्।
पाशाङ्कुशधरं देवं शूलं कल्हारहस्तकम्।।
श्वेतार्कमालिकाभूष्यं पीतवस्त्रधरान्वितम्।
पादुकारूपमित्युक्तं ध्यात्वा देवन्तु भावयेत्।।

428. योगशक्ति(मनोन्मनी) ध्यानम्

देवि शिरदक्षिणमधोक्तसुपादं
गोमुखपदान्त कृतवारिभुजयुक्तम्।

योनिदिशिमध्यगतसुनिश्चितसुलिङ्ग
स्थापित सदाशिव मनोन्मनी स्वरूपम्।।

429.मनोन्मनी स्वरूपम्

ध्यायेद्देवीं त्रिणेत्रां शशिनिभवदनां वेदहस्तां दधानां
सव्ये पद्मं वरदमपरे चाभयं चाक्षमालाम्।
दिव्यैराभरणैर्विभूषिततनुं ब्रह्मादिभिः पूजितां
देवीमेव मनोन्मनीं प्रतिदिनं कामार्थदायीं शुभाम्।।

430.देवी ध्यानम्

सिन्धूराभां त्रिणेत्रां अमृतकळधरां शेखरीं रक्तवस्त्रां
पीनोत्तुङ्गप्रवृत्तस्तनभरनमितां यौवनारम्भरूढाम्।
नानालङ्कारयुक्तां सरसिजनिलयां बीजसंक्रान्तमूर्तिं
देवीं पीशाङ्कुशाढ्यां अभयवरकरां विश्वयोनिं नमामि।।

431.कुण्डोदर ध्यानम्

कुण्डोदरं महाकायमूर्ध्वहस्तं कपालकम्।
हस्ताभ्यामीशवामस्थं भावयेत्गणनायकम्।।
तृणगृहणकामेन ह्यूर्ध्वागश्चित पदद्वयम्।
वरावृत्ताननं ध्येयः द्वयपादद्वयं मृगम्।।

432.कुण्डोदर ध्यानम्

वामे तु रक्तवर्णं स्यात स्वस्तिकं वामपादकम्।
दण्डमध्येन्र्यसेत्पादं प्रसार्य वामपाणिनम्।।

मणिबन्धं भीषणोहतं मणिमालाविभूषितम्।
(कर्णपत्रसमायुक्तं) दंष्ट्राकराळवदनं सर्वाभरणभूषितम्।।

433.महामारि ध्यानम्

ध्यायेद्वीरासनस्थं डमरुकमसिधरं दण्डपाशं कपालं
बिभ्राणं पद्महस्ते प्रथुकुशयुगळं चोर्ध्वकेशं करण्डम्।
कर्णे ताटङ्करत्नं ज्वरविषदुरितं स्फोटकं सुप्रदेशं
रौद्रं श्रीराजवृक्षं द्वयमणि महामारि स्वरूपम्।।

434. नवमारि नामानि

महामारि क्षिप्रमारि ताळमारि उग्ररूपकम्।
शीतमारि क्रोधमारि ज्वलमारि ज्वलनरूपकम्।
विदारी गण्डमारी च नवमारिः प्रकीर्तितम्।।

435.मारियम्मन् ध्यानम्

सर्पज्वाल किरीटोल्लसदनलमुखीं भीमदंष्ट्रं त्रिणेत्रां
क्रूरां खड्गकपालपाशडमरुं सर्वांस्सदा धारिणीम्।
सर्वोपद्रवनाशिनीं हृदि भजे वीरासने संस्थितां
ढक्का पादकुतूहलां सुखकरीं श्री शीतलाम्बां शिवाम्।।

436.महामारी ध्यानम्

कौमारीं रक्तवर्णं स्यात् एकवक्त्रं भुजाष्टकम्।
कर्णयोस्स्वर्णताटङ्गी स्तनमण्डलशोभितम्।
ज्वालकेशं किरीटञ्चामुण्डमाला सुधारिणम्।

खड्गश्च शूलवज्रश्च डमरुं दक्षिणे करे।
वामहस्ते कपालश्च कुलिशं शक्तिखण्ठके।।
दिव्याम्बरधरां देवीं दिव्यगन्धानुलेपनाम्।
रौद्रभावं त्रिणेत्रश्च केशाळकविभूषिताम्।
प्रणवादीनि शक्तीनां प्रसन्नवदनोज्वलाम्।
एकाक्षरी महामारी पादपीठे त्रिमुण्डनी।।

437.मारिकादेवी ध्यानम्

वामे पाशं कपालं डमरुकमपिवरे ऊर्ध्वकेशं करण्डम्।
खड्गं ताटङ्कयुक्तं स्तनपरयुगळं कञ्चुकं छन्नवीरम्।
रौद्रं वीरासनस्थं स्फुरतु विषथुरितो स्फोटकाथीनि
रोगा सान्निध्यं राजवृक्षं सृतमरुणनिभं मारिदेवीं नमस्ते।।

438.सात्विकमारि ध्यानम्

एकवक्त्रं द्विनयनं ज्वालाकेशं किरीटिनम्।
स्तनकञ्चुकमेवोक्तं सर्वाभरणभूषितम्।।
पुस्तकं इक्षुचापेनाभयं चाब्जपुष्पयोः।
सात्वीकं मारिकादेवी ध्यायेत् लक्षणपूजयेत्।।

439.तामसमारी ध्यानम्

नीलवर्णं किरीटश्च ज्वालकेशश्च दंष्ट्रवत्।
खड्गखेटसमायुक्तं पाशाङ्कुशसमन्वितम्।।
सर्वाभरणसंयुक्तं छन्नवीरसमन्वितम्।
एवं तामसमाख्यातं मारिदेवीं विभावयेत्।।

440.राजसमारी ध्यानम्

स्वर्णवर्णं किरीटं च ज्वालाकेशञ्च दंष्ट्रवत्।
रत्नताटङ्कमाख्यातं स्तनकञ्चुकशोभितम्।
खड्गञ्च पानपात्रञ्च त्रिशूलं पाशसंयुतम्।
पद्मासनमिति ख्यातं राजमारिं च पूजयेत्।।

441.उग्रमारी ध्यानम्

एकवक्त्रं त्रिणेत्रञ्च रक्तवर्णं प्रभान्वितम्।
दंष्ट्राकराळवदनं ज्वालाकेशसमन्वितम्।।
करण्डमकुटोपेतं रत्नताटङ्कभूषितम्।
स्तनकञ्चुकमाख्यातं सर्वाभरणभूषितम्।।
खड्गं बाणं च चक्रं च डमरुं दक्षहस्तके।
वामे शूलखेटञ्च चापं वै पानपात्रकम्।।
उग्रमारिमिति ख्यातं भावयेत् सर्वसिद्धिदम्।।

442.रणमारि ध्यानम्

खड्गं बाणंध राङ्गं विजयडमरुकं दक्षहस्ते दधानं
शूलञ्च द्ववेधनु निहितकरं पानपात्रं दधानम्।
देवीं पद्मासनस्थं अरुणमणिनिभम् अग्निकेशं करण्ड
सर्वालङ्कारभूष्यं स्तनपरयुगळं श्यामळारूपमीढे।।

443.वीरमारी ध्यानम्

एकवक्त्रं द्विनयनं करण्डमकुटोज्वलम्।
ज्वालाकेशञ्च दंष्ट्रञ्च कपालं खड्गहस्तके।।

शूलं डमरुकं चैव नारीचं खण्डमेव च।
वीरमारीस्वरूपन्तु ध्यायेल्लक्षण पूजयेत्।।

444.द्रौपती ध्यानम्

द्विपादं एकवक्रन्तु अभयं पङ्कजं तथा।
हरिद्रावस्त्रसंयुक्तं किरीटमकुटोजवलाम्।।
मल्लिकापुष्पसंयुक्तां सर्वाभरणभूषिताम्।
ज्ञानवैराग्यभक्तीनां मोक्षसाम्राज्यकारिणीम्।।
द्रौपतीं हेमवर्णाभां सर्वमङ्गळदायिनीम्।
श्यामवर्णसमायुक्तां चतुर्भुजसमायुतम्।।
शूलं डमरुकं चैव कपालं पाशमेव च।
विकृतिफुल्यनयनां तृलयेस्तापनं भवेत्।।

445.राजगोपुर ध्यानम्

द्वारञ्च ब्रह्मदैवत्यं मध्ये विष्णुं तथैव च।
नाळं कुम्भेषु रुद्रञ्च शिलायष्टिञ्च दारुकैः।।
सर्वदेवरसं चैव सुतैरसञ्च शक्तिषु।
सर्पं तन्त्रविधानञ्च भक्तैश्च गणभूतकैः।
श्रीकाञ्चनमलङ्कर्ता नक्षत्रञ्च समाचरेत्।
इति गोपुररूपन्तु नेत्रञ्च शिरनासिषु।।

446.राजगोपुरध्यानम्

बाणसमवक्रदशबाहुरिविवर्णं बाणधनुखेटमपि छत्रमपि शङ्खम्।
टङ्कमुसलञ्च वरदाभय मृगिञ्च चन्द्रधरगोपुरविदानमयबिम्बम्।।

447.विमान ध्यानम्

उपानं पादुकं चैव जगदी जङ्घमेव च।
कुमुदं जानुसंयुक्तं ऊरुकर्णञ्च पम्मिका।।
हृदयं नाभिमेकञ्च पादयाञ्च तथैव च।
बाहुप्रस्तरसंयुक्तं गलं देवस्य संयुतम्।
शिखरन्तु प्रदेशन्तु मकुटं स्थूपि गोपुरम्।।

448.अङ्गालम्मन् ध्यानम्

एकवक्त्रां त्रिणेत्राञ्च जटामकुटधारिणीम्।
ज्वालाकेशं कराळञ्च दक्षिणे नक्रकुण्डलाम्।।
वामकर्णे तु पत्रञ्च सर्वाभरणभूषिताम्।
दक्षिणे शूलहस्तञ्च टङ्कं चैव समन्विताम्।।
पाशञ्चैव कपालञ्च त्रिरूढं वृषवाहनाम्।
पीताम्बरधरं चैव अङ्गाळपरमेश्वरीम्।।

449.अङ्गालम्मन् ध्यानम्

उग्रवक्त्रां चतुर्हस्तां त्रिणेत्रं रक्तरूपिणीम्।
ज्वलत्केश समायुक्तां नागाभरणभूषिताम्।।
अभयं दक्षिणे हस्ते कपालं वामहस्तके।
ऊर्ध्वे शूलका डमरुं सव्ये धृतं पाशं च वामके।।
एवं ध्यात्वा महाकाळी चण्डिकारूपमुच्यते।।

450.अङ्गाळम्मन् ध्यानम्

चतुर्भुजां अग्रशिखाळकांक्षां सव्ये त्रिशूलं मकुटं करण्डम्।
कपालमह्यै समरून् वहन्तं अहङ्कालकां कुङ्कुमाभां निषन्नाम्।।

451.वाल्मुनी ध्यानम्

रक्तवर्णं द्विनेत्रं च वृत्तनेत्रं विभूषितम्
जटामकुटसंयुक्तं सर्वाभरणसंयुतम्।
खड्गं च उग्र नेत्रे तु दक्षहस्तेन खेटकम्।
लम्बितं दक्षपादश्च शयनं वामपादकम्।
कृष्णकञ्च युतं बद्धं गम्भीरसममेव च।
कर्णभूषणसंयुक्तं मुनिरूपन्तु भावयेत्।।

452.पेच्चियायि ध्यानम्

रक्तवर्णां रविभुजां घोरवक्रां त्रिणेत्रकाम्।
कुन्दौ ऊर्ध्वकेशञ्च आस्योभघटनसंयुतम्।।
शुष्कोतरञ्च जङ्घोर्ध्वे सूक्ष्मवस्त्राङ्गभूषणाम्।
पादान्ते वल्यौ दृश्य तत्पत्नि द्विहस्तकान्।।
पूर्णगर्भभेदिनीं अन्तश्शुचिकरो स्थिताम्।
तस्य मांसञ्च रुधिरं सव्यहस्तेन भक्षिणीम्।।
सर्वशूलमसिं चैव पद्मं चक्रञ्च दण्डकम्।
वामे डमरुखेटञ्च जम्पटं शङ्खमेव च।।
महाघण्टाञ्च संयुक्तां शूलं प्रहरमेव च।
इत्येवं घोररूपन्तु पेच्चिकाली विभावयेत्।।

453.करुप्पर् ध्यानम्

कृष्णाभं रक्तनयनं रक्तपुष्पोपशोभितम्।
भुजद्वयसमोपेतं खड्गं दण्डश्च धारिणम्।।
कर्णे कुलिशबन्धाढ्यं सर्वाभरणशोभितम्।
महापराक्रमायुक्तं पार्श्वे कुक्कुटसंयुतम्।।
सर्वसम्मोहनाकारं कृष्णदेवमहं भजे।।

454.वीरन् ध्यानम्

नीलाभं कृष्णवस्त्रं बद्धकेशं द्विनेत्रं
दीर्घश्च श्रूग्रवदनं बृहद्भक्तसमन्वितम्।
खड्गं च दक्षिणे हस्ते गदा च वामहस्तके
भूम्यां च जानुमाश्रित्य ऊर्वोः कञ्चुकसंयुतम्।।
कट्यां च कृष्णकच्चश्च तदग्रोढ्याणमेव च
किङ्किणी नूपुरं चैव योगवेष्ट्या समन्वितम्।
महाबलाग्रसंयुक्तं ऊर्ध्वदृष्टि समन्वितम्
एवं स्वरूपसंयुक्तं उग्रवीरमहं भजे।।

455.वीरन् ध्यानम्

एकवक्त्रं द्विबाहुश्च दंष्ट्रिणं वृत्तनेत्रकम्।
सोष्णीश मस्तकोपेतं भ्रकुटी कुटिलान्वितम्।
श्रमश्रुमन्तं महाबाहुं कृष्णवर्णं सकुण्डलम्।
खड्गं दक्षिणहस्तेन दण्डं वामकरेण च।
दधानं पादुकारूढं सारमेयकुलाप्रदम्।

धावन्तमवतिष्ठन्तं वीरं वीराट्टहासिनम्।
भीमरूपमहं ध्यायेत् छास्त्राज्ञा परिपालकम्।।

456.कात्तवरायन ध्यानम्

रक्तवर्णं द्विनेत्रञ्च बद्धाळकविभूषितम्।
क्रूरदृष्टिसमायुक्तं ब्रगूंमचिकरेष्टकम्।
गुहांशे सुन्दरं प्राप्य सर्वाभरणभूषितम्।
दक्षिणे खड्गहस्तेन खेटकं वामहस्तके।
कृष्णकञ्च समायुक्तं कृपाणं बद्धसंयुतम्।
पादुकारूढसंयुक्तं वीरासनसमद्युतिम्।
विन्दित्याविप्रकर्णाञ्च शक्तिद्वयसमन्वितम्।
एकमेवं महाज्वाला कात्तवरायस्वरूपकम्।।

457.महागणपति ध्यानम्

हस्तीन्द्राननमिन्दुचूडमरुणच्छायं त्रिणेत्रं रसा
दाश्लिष्टं प्रियया सपद्मकरया स्वांकस्थया सन्ततम्।
बीजापूरगदेषु कार्मुक लसाच्छक्राब्ज पाशोत्पलं
व्रीह्यग्र स्वविषाणरत्नकलशान् हस्तैर्वहन्तं भजे।।

458.एकाक्षरगणपति ध्यानम्

रिक्ता रक्ताङ्गरागं शुककुसुमयुत स्तुन्दिलश्चन्द्रमौलिं
नेत्रैर्युक्तस्त्रिभिः वामकरे चरणो बीजपूरं दधानः।
हस्त्राग्रा क्लृप्तपाशाङ्कुशरद वरदो नागवक्त्रो हि भूषो
देवः पद्मासनस्थो भवत् सुखकरो भूतये विघ्नराजः।।

459.वरगणपति ध्यानम्

सिन्धूराभमिभाननं त्रिनयनं हस्तैश्च पाशाङ्कुशौ
बिभ्राणं मधुमत् कपालमनिशं साथ्विन्दुमौलीं भजे।
पुष्याश्लिष्टतनुं ध्वजाग्रकरया पद्मोल्लसद्धस्तया
तद्योन्याहितपाणिनात्तवसुत् पात्रोल्लसत पुष्करम्।।

460.त्रिधाक्षरगणपति ध्यानम्

गजेन्द्रवदनं साक्षाच्च लसत्कर्णसुचामरं
हेमवर्णं चतुर्बाहुं पाशाङ्कुशधरं वरम्।
स्वदन्तं दक्षिणे हस्ते सव्ये त्वाम्रफलं तथा।
पुष्करे मोदकं चैव धारयन्तमनुस्मरेत्।।

461.त्रिधाक्षरगणपति ध्यानम्

धृतपाशाङ्कुशकल्पलताश्वरदश्च बीजपूरयुतः
शशिकलकलितमौलिस्त्रिलोचनोरुणश्च गजवदनः।
भासुरभूषणदीप्तो बृहदुदरपद्मविष्टरोल्लसितः
विघ्नपयोथ पवनः करधृतकमलस्सदास्तु मे भूत्यै।।

462.हरिद्रागणपति ध्यानम्

हरिद्राभं चतुर्बाहुं हारिद्रावदनं प्रभुम्।
पाशाङ्कुशधरं देवं मोदकं दन्तमेव च।।
भक्ताभयप्रदातारं वन्दे विघ्नविनाशनम्।।

463.एकदन्तगणपति ध्यानम्

लम्बोदरं श्यामतनुं गणेशं कुठारमक्षस्रजमूर्ध्वगाभ्याम्।
सल्लड्डुकं दन्तमधः कराभ्यां वामेतराभ्यां च दधानमीडे।।

464.उत्तण्डगणपति ध्यानम्

कल्हाराम्बुज बीजपूरकगदा दन्तेक्षु चापं शुभं
बिभ्राणौ मणिकुम्भशालिकलशौ पाशं सृणीश्चाब्जकम्।
गौराङ्ग्या रुचिरारविन्दकरा देव्यास्समालिङ्गितः
शोणाङ्गश्शुभमातनोतु भजतामुद्दण्डविघ्नेश्वरः।।

465.ऋणमोचनगणपति ध्यानम्

पाशाङ्कुशौ दन्त जम्बूदधान स्फटिकप्रभः।
रक्तांशुको गणपतिर्मुदेस्याद् ऋणमोचकः।।

466.तुण्डिगणपति ध्यानम्

अक्षमालां कुठारञ्च रत्नपात्रं स्वदन्तकम्।
धत्ते करैर्विघ्नराजो डुण्डिनामा मुदोऽस्तु नः।।

467.द्विमुखगणपति ध्यानम्

स्वदन्तपाशाङ्कुश रत्नपात्रं करैर्दधानो हरिनीलगात्रः।
रक्तांशुको रत्नकिरीटमालीर्भूत्यैस्सदा मे द्विमुखो गणेश्वरः।।

468.त्रिमुखगणपति ध्यानम्

श्रीमत्तीक्ष्णशिखां कुशाक्षवरदान् दक्षे दधानः करैः
पाशञ्चामृतपूर्णकुम्भमभयं वामे दधानो मुदा।

पीठे स्वर्णमथारविन्दविलसत् सत्कर्णिकाभा सुरे
आसीन स्त्रिमुखः पलाशरुचिरो नागाननः पातु नः।।

469.सिंहगणपति ध्यानम्

वीणां कल्पलतां अरिञ्च वरदं दक्षे विधत्ते करैः
वामे तामरसञ्च रत्नकलशं सन्मञ्जरी चाभयं
शुण्डा दण्डलसत् मृगेन्द्रवदनः शङ्खेन्दु गौरः शुभो
दिव्यात रत्ननिभां शुको गणपतिः पायादपायात् स नः।।

470.योगगणपति ध्यानम्

योगारूढो योगपट्टाभिरामो
बालार्काभश्चेन्द्रनीलांशुकाड्यः।
पाशेक्ष्वक्षान् योगदण्डं दधानो
पायात्कर्ता योगविघ्नेश्वरो नः।।

471.दुर्गा गणपति ध्यानम्

तप्तकाञ्चनसंकाशश्चाष्टहस्तो महातनुः।
दीप्ताङ्कुशं शरं चाक्षं दन्तं दक्षे वहन् करैः।।
वामे पाशं कार्मुखं च लतां जम्बुर्दधत् करैः।
रक्तांशुकस्सदा भूयात् दुर्गागणपतिर्मुदे।।

472.शङ्कटहरगणपति ध्यानम्

बालार्कारुणकान्तिर्वामे बालां वहन्मणिकलस दिण्डिवरहस्तां
गौराङ्गीं रत्नशोभाढ्यां दक्षेङ्कुशवरदानं वामे पाशं च पायसम्।

पात्रं नीलांशु कलसमानः पीडे पद्मारुणतिष्ठन् संकरहरणः
पायात् संकटपूगाङ्गजाननो नित्यम्।।

473.गो ध्यानम्

गोरूपं मातृकाशक्तिः शृङ्गाग्रे सर्वदेवताः।
मुखे तु चन्द्रदैवत्यं पृष्ठे गङ्गासरस्वती।
पादेषु धर्मदेवांश्च स्कन्दोदराग्निसूर्ययोः।
पुच्छाग्रे सर्वतीर्थानि रोममूले ऋषीश्वराः।
इत्येवं देवतारूपं गोदेवीं नमोऽस्तु ते।।

474.रक्तचामुण्डी ध्यानम्

रक्ताभां पीतवस्त्रां स्मितमुखकमलां इन्दुरेखावतंसां
दिव्यैर्माणिक्कमुक्तामणिकनकखचितैः भूषणैर्दीप्यमानाम्।
पुण्ड्रे जिह्वा च बाणां रिचलच सुभुजां फुल्लपद्मायताक्षीं
चामुण्डीं सुक्सृमुण्डीं रिपुकुलवदनां शाङ्करीं भावयामि।।

475.श्रीविद्यागणपति ध्यानम्

द्वाभ्यां विभ्राजमानं धृतकलशमहा शृङ्गलाभ्यां भुजाभ्यां
बीजापूरादि बिभ्रत् दशभुजमरुणं नागभूषं त्रिणेत्रम्।
सन्ध्यासिन्दूरवर्णं स्तनपरनमितं तुण्डिलं चन्द्रचूडं
कण्ठादूर्ध्वं करीन्द्रं युवतिमयमथ स्तौमि विद्यागणेशम्।।

476.द्वारकुमार ध्यानम्

सकलगुणसमुद्रं सम्भृतानन्दभद्रं कमलरुचिरनेत्रं काञ्चिकारण्यपात्रम्।
भुवनविहितकीर्तिं भूषितो द्वारमूर्तिं शरवणभवमीशं शैलकन्याकुमारम्।।

477.केतीनृत्तपुरस्वामि ध्यानम्

शुद्धस्फाटिकविग्रहं स्मितमुखं चिन्मुद्रबाहुद्वयम्
कट्यान्यस्तकरांबुजं त्वभयदं पीताम्बरालङ्कृतम्।
भक्ताभीष्टफलप्रदं शिवसुतं ज्ञानप्रदं योगिनः
केतीनृत्तपुराधिपं गुहमजं ध्यायेत सदा भीष्टदम्।।

478.स्वामिनाथ ध्यानम्

ऊरुहस्तं दण्डपाणिं मौञ्जीकौपीनधारिणम्।
शुक्लयज्ञोपवीतञ्च सुप्रसन्नं स्मिताननम्।
सिन्दूरारुणवर्णं च किञ्चिदूर्ध्वं शिखोज्वलम्।
भक्ताभीष्टप्रदातारं स्वामिनाथमऽहं भजे।।

479.स्कन्दगुरु ध्यानम्

षडाननं द्विषट्कर्णं षड्भिमौलिभिरायुतम्।
रक्ताभं द्वादशाक्षञ्च भानुहस्तसमन्वितम्।।
शूलञ्च खड्गबाणञ्च चक्रपाशञ्च दक्षिणे।
अङ्कुशं च ध्वजं चैव खेटकं धनुवज्रकम्।।
वराभयसमायुक्तं रक्तमाल्यानुलेपनम्।।

480.कोदण्डसुब्रह्मण्य ध्यानम्

अरुणकिरणवर्णम् अम्बुजं दक्षपादं
इतरचरणकेकी पृष्ठभागे निवेशम्।
कुलिशधरधराढ्यं शक्तिकोदण्डहस्तं
शरवणभवमीशं सन्ततं भावयामि।।

481.धनुर्हस्तसुब्रह्मण्य ध्यानम् (திருவையாறு உற்சவர்)

वज्रशक्तिशरचापपाणिनं एकवक्रमरविन्दलोचनम्।
सव्यपादमिहपादुकस्थितं वामपादशिखिनस्थितं भजे।।

482.ईशान ध्यानम् (शुध्ध सादाख्य)

अभयवरदपाणिं चन्द्रमग्निं त्रिणेत्रं
स्फटिककिरणगात्रं भस्मरुद्राक्षभूष्यम्।
मकुटसलिलचन्द्रं अम्बरं व्याघ्रचर्मं
गगनवदनसौम्यं नृत्तमीशानरूपम्।।

483.तत्पुरुष ध्यानम् (अमूर्ति सादाख्य)

कुलिशवरदहस्तं कुङ्कुमाभं त्रिणेत्रं
नलिनवदनशोभं नागराजेन्दुमौलिम्।
उदयकिरणवक्रं दिव्यरुद्राक्षधामं
शयनपुरुषशान्तमऽमूर्तिसाद्यख्यरूपम्।।

484.अघोरमूर्ति ध्यानम् (मूर्ति सादाख्य)

असितकुसुमवर्णं भानुचन्द्राग्निनेत्रं
ज्वलनवदनदंष्ट्रं धारिणं खड्गखेटम्।
उरगकमंगसूकरं दन्तमाल्यञ्ज
मनचणघोरं मूर्तिसाद्यख्यरूपम्।।

485.वामदेव ध्यानम् (कर्तृ सादाख्य)

पङ्कजवदनदीप्तं भागीरथी चन्द्रमौळिं
अङ्कुशपरशुहस्तं भूषणं चर्मवस्त्रम्।

शङ्करममलमूर्तिं पार्वती वामभागं
किङ्किणीनलिनपादं कर्तृसाद्यख्यरूपम्।।

486.सद्योजात ध्यानम् (कर्म सादाख्य)

कपिलपयसुवर्णं कालकण्ठं त्रिणेत्रं
किमुभयधवळवस्त्रं धारिणं पाशशूलम्।
असितमुरगभूष्यं चन्द्रगङ्गाकपर्दिं
कमलमुभयपादं कर्मसाद्यख्यरूपम्।।

487.महादेवरुद्र ध्यानम्

ध्यायेन्निरामयं देवं जगष्टयादिकारणम्।
निर्गुणं निष्कळं नित्यं मनोवाचामगोचरम्।।
गङ्गाधरं शिशिधरं जटामकुटमण्डितम्।
श्वेतभूतित्रिपुण्ड्रेण ललाटेन विराजितम्।
लोचनत्रयसम्पन्नं स्वर्णकुण्डलमण्डितम्।
दिव्याम्बरं रक्तभूषं रत्नसिंहासनस्थितम्।
सर्वाभीष्टप्रदातारं वटमूलनिवासिनम्।
सनातनं साम्बमूर्तिं वरमात्मानमव्ययम्।
आवाहयामि जगतां ईश्वरं परमेश्वरम्।।

488.हररुद्र ध्यानम्

सुरापः स्वर्णहारी च रुद्रजापी जले स्थितः।
सहस्रशीर्षा जापी च मुच्यते सर्वकिल्बिषैः।
शूलवर्यधरं देवं हरं विषमलोचनम्।।

489.रुद्ररुद्र ध्यानम्

कालाग्निरूपिणं रुद्रं जटामकुटमण्डितम्।
त्र्यक्षं चतुर्भुजं देवं नमामि शिरसा विभुम्।।

490.शङ्कररुद्र ध्यानम्

शङ्करं शान्तवदनं वराभयविशोभितम्।
लोकानां शोकहन्तारं चन्द्रचूडमहं भजे।।

491.नीललोहितरुद्र ध्यानम्

त्र्यक्षं चतुर्भुजं शान्तं सुन्दरं नीललोहितम्।
पद्मासनस्थं देवेशं नमामि वृषवाहनम्।।

492.ईशानरुद्र ध्यानम्

ईशानं देवदेवेशं प्रणमामि सदाशिवम्।
रुद्राक्षमालाभरणं गङ्गाचन्द्रकलाधरम्।।

493.विजयरुद्र ध्यानम्

भजेऽहं सुन्दरं देवं विजयं फाललोचनम्।
जटामकुटसंयुक्तं भक्तानां भीतिनाशनम्।।

494.भीमरुद्र ध्यानम्

भीममिन्दुकलाभूषं पापीनां भीषणाकृतिम्।
वरदं त्रिपुराराधिं वरायुधधरं भजे।।

495.देवदेवरुद्र ध्यानम्

देवदेवं देवसेव्यं वराभयविशोभिनम्।
भक्तकाञ्चितदातारं पार्वतीशमऽहं भजे।।

496.भवोद्भवरुद्र ध्यानम्

भवं सर्वार्थदं देवं पुत्रपौत्रफलप्रदम्।
धर्मार्थकाममोक्षाणां भजे दातारमीश्वरम्।।

497.कपालीशरुद्र ध्यानम्

कपालीशमिति ज्ञेयं नेत्रत्रयविराजितम्।
प्रसन्नवदनं वन्दे जटामण्डलमण्डितम्।।

498.डिण्डि (द्वारपालक) ध्यानम्

अरुणकिरणरूपं चास्यभीमं त्रिणेत्रं
जटिमृगवदनमोर्ध्वं अन्यपादोर्ध्ववक्रम्।
विकसितकरयुग्मं विस्मयं दण्डमग्निं
मुनिवरनरसेव्यं डिण्डिरूपं भजामि।।

499.मुण्डि (द्वारपालक) ध्यानम्

अनलतनुनिभाङ्गं वज्रभीमं जटोर्ध्वं
विकसितकरदण्डं वास्तुमुद्रां गृहस्थम्।
घटितटबद्धपाशं कङ्कणं दामभूष्यं
मुनिवरनरसेव्यं मुण्डिरूपं भजामि।।

500.वृषभ ध्यानम्

श्रुतिपदमनलशृङ्गं भास्करेन्दु द्विनेत्रं
हरिशिवविधिशीर्षं शाश्विनी कर्णरूपम्।
नवमणिकृतमाला नूपुरं दिव्यरत्नं
स्फटिकधवळगात्रम् उक्षराजं नमामि।।

501.वृषभशक्ति ध्यानम्

ज्वालोर्ध्वकेशां सुदंष्ट्रां द्विनेत्रां नासाद्वयं वेदकुचैश्चयुक्ताम्।
बाणञ्च चापञ्च वराभयञ्च वृषस्य शक्तिं वृषदेव वामे।।

502.बलिनायकर् ध्यानम्

अभयवरदपूर्वं कृष्णहस्ते परेशं
परशुकरचतुर्भिः चन्द्रभान्वर्कपुष्पम्।
जटामौळिगङ्गा स्थानकं शक्तियुक्तं
कमलचरणमीडे श्रीबलिनायकेशम्।।

503.शिबिकारूढ ध्यानम्

वेदहस्तं त्रिणेत्रं च जटामकुटमण्डितम्।
वरदं मृगं करे वामे सव्ये परश्वभीतिकम्।।
सर्वाङ्गसुन्दरं देवं व्याघ्रचर्मोत्तरीयकम्।
वामे ह्युमां द्विनेत्रां च किरीटमकुटान्विताम्।।
सव्योत्पलधरां देवीं त्रिभङ्गीमनलं सिताम्।।

504.प्रत्यङ्गिरास्त्र ध्यानम्

सिंहीं सिंहमुखीं सखीं भगवतः पञ्चाननस्योल्लसत्
शूलस्थूलकपालपाशडमरु व्याघ्राग्र हस्ताम्बुजाम्।
दंष्ट्रां कोटिविशङ्कदास्यकुहरीं आरक्तनेत्रत्रयीं
ध्यायेत् शत्रुभयापहारनिपुणां प्रत्यङ्गिरां भावये।।

505.सुदर्शनास्त्र ध्यानम्

कल्पान्तार्कप्रकाशं त्रिभुवनमखिलं तेजसा पूरयन्तं
रक्ताक्षं पिङ्गकेशं रिपुकुलभयदं भीमदंष्ट्राट्टहासम्।
शङ्खं चक्रं गदाब्जं प्रथुतरमुसलं चापपाशाङ्कुशादीन्
बिभ्राणं दोर्भिराद्या मनसि मुररिपोः भावयेच्छक्रराजम्।।

506.द्विभुजभैरव ध्यानम्

द्विभुजं श्यामवर्णं च द्विपादश्च द्विनेत्रकम्।
शूलञ्च दक्षिणे हस्ते कपालं वामहस्तके।
ज्वालाकेशं नग्नरूपं सर्पयज्ञोपवीतिनम्।
सर्वालङ्कारसंयुक्तं श्वानवाहनसंयुतम्।।

507.चतुर्भुजभैरव ध्यानम्

नीलवर्णं त्रिणेत्रं च कटिसूत्रन्तु सर्पकम्।
नग्नरूपं द्विपादं च श्वानवाहनसंयुतम्।
चतुर्बाहुसमायुक्तं भीमरूपं जटाधरम्।
शूलं च डमरुकं चैव दक्षयोर्हस्तयोद्धृतम्।

किङ्किणीमालया भूष्यं छन्नवीरञ्च नूपुरम्।
उग्ररूपं सुदंष्ट्रं च सर्वाभरणभूषितम्।
क्षेत्रपालमिदं प्रोक्तं सर्वकामफलप्रदम्।।

508.षड्भुजभैरव ध्यानम्

श्यामवर्णं द्विनेत्रं च एकवक्त्रं द्विपादकम्।
षड्भुजञ्च कराळास्यं भीमरूपं जटाधरम्।।
शूलं खड्गञ्च दण्डं च दक्षिणे तु करे धृतम्।
पाशं खेटं कपालं च वामे तु धारयेत्तथा।
किङ्किणीमालया यष्ट्या छन्नवीरसमन्वितम्।
पादनूपुरसंयुक्तं सर्वाभरणभूषितम्।।

509.अष्टभुजभैरव ध्यानम्

एकवक्त्रं त्रिणेत्रञ्च ऊर्ध्वकेशं भुजाष्टकम्।
दक्षिणे चाभयं शूलं घण्टां सर्पञ्च धारिणम्।
वामे कपालपाशौ च डमरुं वरमेव च।
नीलमेघसमाभासं शिरोमालाविभूषितम्।
किङ्किणीमालया भूष्यं पादनूपुरशोभितम्।
सर्वाभरणसंयुक्तं उग्रदंष्ट्रं तथैव च।
एवं ध्यायेत् विशेषेण श्वानवाहनसंयुतम्।।

510.क्षेत्रपाल ध्यानम्

निर्वाणं निर्विकल्पं निरुपमचलं निर्विकारं क्षकारं
हुंकारं वज्रदंष्ट्रं हुतवहनयनं रौद्रमुन्मत्तवेषम्।

फट्कारं बद्धनागं भ्रकुटितसुमुखं भैरवं शूलपाणिं
खट्वाङ्गं व्योमनीलं डमरुकसहितं क्षेत्रपालं नमामि।।

511.क्षेत्रपालभैरव ध्यानम्

नग्नरूपं त्रिणेत्रञ्च सर्वाभरणभूषितम्।
रत्नकुण्डलसंयुक्तं शिरोमालाविभूषितम्।
खड्गशूलकपालञ्च डमरुं भीमदंष्ट्रकम्।
बिभ्राणं श्वानकारूढं क्षेत्रपालमहं भजे।।

512.क्षेत्रपालभैरव ध्यानम् (यज्ञरक्षभैरवः)

त्रिणेत्रं नग्नरूपञ्च शूलपाशकपालकम्।
डमरुं रक्तवर्णाभं किङ्किणीमालयायुतम्।।
क्रूरदंष्ट्रोग्ररूपञ्च यज्ञरक्षाधिकारिणम्।
श्वनकञ्च ज्वलत्केशं क्षेत्रपालमहं भजे।।

513.महाभैरव ध्यानम्

भ्रकुटितटमुखं दंष्ट्रिणं भीमनेत्रं ज्वालकेसं
त्रिणेत्रं त्रिशिखडमरुकं पाशहस्तं कपालम्।
घण्टामालाविभूषितं फणिकटिसूत्राकृतिं किङ्किणीं
अर्धचन्द्रं वृश्चिकधरं महाकालं महाभैरवम्।।

514.स्वर्णाकर्षणभैरव ध्यानम्

पीतवर्णं च षट्बाहुं त्रिणेत्रं पीतवाससम्।
अक्षय्यं स्वर्णमाणिक्यतटित्स्फुटितपात्रकम्।

अभीप्सितमहाशूलं चामरं तोमरद्वयम्।
सुदिनं चिन्तयेद्देवं भैरवं स्वर्णसिद्धिदम्।।

515.विष्णुकञ्चुकधारि भैरव ध्यानम्(कारणे)

द्विभुजश्च द्विनेत्रश्च वृत्तपिङ्गजटाधरम्।
श्वेतवर्णसमायुक्तं कुण्डलं कर्णपत्रकम्।
अभयं दण्डसंयुक्तं लम्बितं स्तनपार्श्वयोः।
शूलाभं लम्बितं चैव मणिमालाविभूषितम्।
कटिसूत्राकृतिं नागराजयुग्मेन संयुतम्।
पद्मपीठोपरिस्थं च ह्रस्वदेहसमन्वितम्।
किञ्चिद्दंष्ट्रं महाभीमं विष्णुकञ्चुकधारिणम्।
एवं ध्यात्वा महादेवं इष्टसिद्धिर्भविष्यति।।

515.भोगशक्ति ध्यानम्

एकवक्त्रां द्विपादं च त्रिणेत्रां द्विभुजान्विताम्।
द्विहस्ताब्जकसंयुक्तां त्रिभङ्गाङ्गेनलाञ्छिताम्।
सर्वाभरणसंयुक्तां पादान् ऋपुरशोभिताः।
दिव्यमालाङ्गरागाढ्यां भोगशक्तिं समर्चयेत्।।

517.पराशक्ति ध्यानम्

अव्यक्तां अचलां शान्तां निर्गुणाञ्च निरामयाम्।
सर्वज्ञां सर्वकर्त्रीं च नित्यतृप्तकरीन्तथा।
स्वतन्त्राञ्च दयालुप्तामाद्यन्तरहितान्तथा।
शुद्धस्फटिकसंकाशां तेजोव्याप्तदिगन्तराम्।
षाड्गुण्यपरिपूर्णाङ्गीं पराशक्तिं विभावये।।

518.राजराजेश्वरी ध्यानम्

बालार्कायुतसन्निभां त्रिणयनां रक्ताम्बरोल्लासिनीम्
नानालङ्कृतराजमानवपुषीं बालोद्धराट् शेखराम्।
हस्तैरिक्षु धनुशृणीं सुमशरं पाशं मुदा बिभ्रतीं
श्रीचक्रस्थितसुन्दरीं त्रिजगतां आधारभूतां स्मरेत्।।

519.मीनाक्षी ध्यानम्

अम्बामम्बुदनीलकुन्तलहरां चन्द्रार्कचूडोज्वलाम्
भास्वत् रत्नकिरीटकुण्डलधरां पूर्णेन्दु बिम्बाननाम्।
हे राजन् रत्नविलम्बितकर्णयुगलां कस्तूरिका फालकां
मीनाक्षीं मधुरेश्वरस्य महिषीं चित्ते सदा भावयेत्।।

520.सर्वजनमोहिनी ध्यानम्

भुवनविजयदक्षा पुष्पबाणेक्षु चापा
जगति विविधरूपा दर्शयन्ती जनानाम्।
अरुणतरुणरूपा श्वेतवासोवसानां
जयति निखिललोका जीवनीमोहनीया।।

521.द्विभुजदेवी ध्यानम्

द्विभुजां चारुवदनां सुस्तनां च सुयौवनाम्।
दुकूलवसनां शान्तां किञ्चित्प्रहसिताननाम्।।
सर्वाभरणसंयुक्तां आसने हरवत्स्थिताम्।
करण्डमकुटोपेतां ध्यायेद्देवीमनुक्रमात्।।

522.द्विभुजदेवी ध्यानम्

मातङ्गीं भूषिताङ्गीं मधुमतमुदितां नीलमालाढ्यवेणीं
सत्वीणां शोणशैलां मृगमदतिलकां इन्दुरेखावतंसाम्।
कर्णोद्यश्च शङ्खभद्रां स्थितमधुरदृशा साधकस्येष्टधात्रीं
ध्यायेद्देवीं शुकाभां शुकमखिलकला रूपमस्याश्चपार्श्वे।।

523.वाग्वादिनी ध्यानम्

अमलकमलसंस्थां लेखिनी पुस्तकोद्यत्
करयुगलसरोजा कुन्दमन्दीरगौरा।
दृधशशिधरकण्ठोल्लासिकोटीरकवीटा
भवतु भवभ्यानां भङ्गिनी भारती नः।।

524.अन्नपूर्णा ध्यानम्

आधाय दक्षिणकरेण स्वर्णदर्वीं
दुग्धान्नपूर्णमित्रेण च रत्नपात्रम्।
अन्नप्रदाननिरतां नवहेमवर्णां
अम्बां भजे कनकभूषणमाल्यशोभाम्।।

525.कामाक्षी ध्यानम्

कञ्चाक्षीं कमनीयकल्पलतिकां काञ्चीपुराधीश्वरीं
मञ्जीराजितपादपद्मयुगळां माध्वीरसा नन्दिनीम्।
सज्जत् काञ्चनरत्नकङ्कणलसद्ग्रैवेय हारोज्ज्वलाम्
कामाक्षीं नवयौवनां भज मनःकामेश्वरालिङ्गिताम्।।

526.त्रिपुरसुन्दरी ध्यानम्

हस्ताभ्यां पुष्पबाणान् रिपुहरणमयं अङ्कुशं चैव भद्रां
बिभ्राणां दक्षिणाभ्यां मणिमयमकुटां इक्षुचापञ्च पाशम्।
वामाभ्यां रत्नकाञ्ची परिवृतजगतां रत्नकेयूरहारां
दिव्यालङ्कारयुक्तां त्रिभुवनजननीं दिव्यगन्धानुलिप्ताम्।।

527.नवदुर्गा नामानि

अग्निमहाजलोब्रह्माविष्णुरुद्रोवनस्तथा।
स्थूलशूलिनी भेदाख्याः नवदुर्गेति नामकः।।

528.कात्यायनी ध्यानम्

बन्धूकारुण सुप्रभां स्मितमुखीं कल्याणदात्रीं शिवां
पाशाभीतिवराङ्कुशां च दधतीं सर्वामरे वन्दिताम्।
गौरीं स्कन्दगणेशदेवजननीं कारुण्यवारां निधिं
देवीं शङ्करवल्लभां त्रिणयनां कात्यायनीं भावये।।

529.अष्टादशभुजदुर्गा ध्यानम् (चण्डी)

श्वेतानना नीलभुजा सुश्वेत स्तनमण्डला।
रक्तमद्या रक्तपादा नीलजङ्घोरुरुन्मदा।।
सुचित्रजघना चित्रमाल्याम्बरवीभूषणा।
चित्रानुलेपना कान्तिरूपसौभाग्यदायिनी।।
अष्टादशभुजा पूज्या सा सहस्रभुजा सती।
आयुधान्यत्र वक्ष्यन्ते दक्षिणातःकरक्रमात्।।
अक्षमाला च कमलं बाणोसि कुलिशं गदा।

चक्रं परशुं त्रिशूलं शङ्खो घण्टा च पाशकः।।
शक्तिर्दण्डश्चर्मचापं पानपात्रं कमण्डलुम्।
अलङ्कृतभुजामेभिः आयुधैः कमलासनाम्।।

530.अष्टभुजदुर्गा ध्यानम्

अष्टभुजाङ्गीं महिषस्य मर्दिनीं सशङ्खचक्रां शरशूलधारिणीम्।
तां दिव्ययोगिं सच जातवेदसीं दुर्गां सदाऽहं शरणं प्रपद्ये।।

531.शान्तिदुर्गा ध्यानम्

रोगोपद्रव शत्रुभीति विविध क्रूराहि शूकोल्पना
दुष्टारिष्टपिशाचजाः बहुविधाः तापदोह्या मया।
यत्ध्यानात् प्रशमं प्रयान्ति सहसाः सा शान्तिदुर्गावतात्
हस्ताश्लिष्ट वरत्रिशूलकमलाऽभीतिः मृगेन्द्रासना।।

532.आसुरिदुर्गा ध्यानम्

बालेन्दु श्वेतवर्णां विकसितनयनां वामहस्ते त्रिशूलां
दक्षे स्ताल्यङ्कुशाढ्या हृतरुणवदनां नागयज्ञोपवीतिम्।
नानालङ्कारयुक्तां सुललितवदनां तुर्यवेदस्य पुत्रीं
दुर्गां पद्मासनस्थां अखिलवशकरीं आसुरीं त्वां नमामि।।

533. अग्निदुर्गा ध्यानम्

रक्तवर्णाञ्चैकवक्त्रां त्रिणेत्रां षड्भुजान्विताम्।
शङ्खचक्रकपालञ्च खड्गखेटकधारिणीम्।
त्रिशूलकरसंयुक्तां महिषोपरिसंस्थिताम्।
सर्वाभरणशोभाढ्यां अग्निदुर्गामहं भजे।।

534.महादुर्गा ध्यानम्

विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम्।
हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिणेत्रां भजे।।

535.जलदुर्गा ध्यानम्

शङ्खासिचापशरभिन्नकरां त्रिणेत्रां
तिग्मेतरां शुकलयां विलसत् किरीटाम्।
सिंहस्थितां ससुरसिद्धनुतां च दुर्गां
दूर्वानिभां दुरितवर्गहरां नमामि।।

536.विष्णुदुर्गा ध्यानम्

नीलोत्पलनिभां देवीं नीलकुञ्चितमूर्धजाम्।
पीताम्बरवरोपेतां भूषणं सृग्विभूषिताम्।
शङ्खचक्रगदाभीति रम्यहस्तां द्विलोचनाम्।
सर्वकामप्रदां सौम्यां विष्णुदुर्गामहं भजे।।

537.रुद्रदुर्गा ध्यानम्

गरुडोत्पलसन्निभां मणिमौलिकुण्डलमण्डितां
नौमि फालविलोचनां सितवाससां शिवरूपिणीम्।
शङ्खचक्रकृपाणचापशूलमभयूरुहस्तकां
खड्गिनीमपि बिभ्रतीं निजबाहुभिः शशिशेखराम्।।

538.स्थूलदुर्गा ध्यानम्

श्यामवर्णां त्रिणयनां चतुर्भुजविराजिताम्।
अक्षमालाधरां वीणामङ्कुशं पाशहस्तकम्।
जटामकुटशोभाढ्यां चन्द्ररेखाविभूषिताम्।
सुन्दरीं स्थूलदुर्गां तां भक्ताभीष्टप्रदायिनीम्।।

539.शूलिनी दुर्गा ध्यानम्

बिभ्राणां शूलबाणासि अरिसतरगदा चाप पाशाङ्कराब्जैः
मेघश्यामा किरीटोल्लकितजटधराभीषणा भूषणाढ्या।
सिंहस्कन्दादिरूढा शतस्पृशिखेटान् विताभिःपरीता
कन्याभिःभिन्नदैत्या भवतु भवभय ध्वंसिनी शूलिनी वः।।

540.दुर्गा ध्यानम् (उत्तराभिमुखोपेता)

सुवस्त्रां नीलकेशां च नीलोत्पलदलाकृतिम्।
सुस्तनीं चारुवदनां सर्वाभरणभूषिताम्।।
शङ्खचक्रं च दधतीं दक्षिणेनाभयप्रदाम्।
ऊरौ वामभुजां चैव दैत्यसंहारकारिणीम्।।
कुचबद्धसमायुक्तां महिषस्य शिरःस्थिताम्।
उत्तराभिमुखोपेतां दुर्गादेवीं नमाम्यहम्।।

541.शिवदुर्गा ध्यानम्

शङ्खचक्रकिरीटं च अभयं चोरुहस्तकाम्।
त्रिणेत्रां च त्रिभङ्गीं च श्यामवर्णसुशोभिताम्।

शिवदुर्गामिति ध्यायेत् महिषोपरि संस्थिताम्।
सर्वाभरणभूषाढ्यां सर्वशत्रुविनाशिनीम्।।

542.शङ्खनिधि ध्यानम्

वसुन्धरं दक्षभुजे चालिङ्ग्यतु सुपाण्यकम्।
वामेशङ्खधरं मुक्तानिभं शङ्खनिधिम्भसा।

543.पद्मनिधि ध्यानम्

आलिङ्ग्यन्तं वसुमतीं ललाटे पद्मचिह्निकम्।
भजे पद्मनिधिं नित्यं वामेनोत्पलधारिणीम्।।

544.चतुर्भुजमहालक्ष्मी ध्यानम्

चतुर्भुजां महालक्ष्मीं गजयुग्मसुपूजिताम्।
पद्मपत्राभनयनां वराभयकरोज्वलाम्।
ऊर्ध्वद्वयकरे चाब्जं दधतीं शुक्लवस्त्रकाम्।
पद्मासने सुखासीनां भजेऽहं सर्वमङ्गलाम्।।

545.लक्ष्मी ध्यानम्

चतुर्भुजां महालक्ष्मीं जगत्रयसुपूजिताम्।
ध्यायेन्मृगाक्षीं वरदां तथैवाऽभयपाणिनीम्।।

546.श्रीलक्ष्मी ध्यानम्

मुक्ताभं दिव्यवस्त्रां मृगमदतिलकां फुल्लकल्हारमालां
केयूरैः मेखलाद्यैः नवमणिखचितैः भूषितैर्भासमानाम्।

कर्पूरामोदवक्त्रां अपरिमितकृपापूर्णनेत्रारविन्दां
श्रीलक्ष्मीं पद्महस्तां जितपतिहृदयां विश्वभूतिं नमामि।।

547.आदिलक्ष्मी ध्यानम्

बीजापूरफलं गदामपि करैः पात्रं तथा खेटकं
बिभ्राणां नवरत्नशोभिमकुटं पीताम्बरालङ्कृताम्।
तप्तस्वर्णसमानकान्तिरुचिरां सौवर्णभूषोज्वलां
नागाद्यङ्कित शीर्षकां हृदि सदेवाद्यश्रियं चिन्तये।।

548.सन्तानलक्ष्मी ध्यानम्

गाङ्गेयः प्रति मे शिशौ सकरुणं विन्यस्तवीक्षां शुभां
रम्यैः पाणिसरोरुहैः सुकलशं खड्गं शिशुं चाभयम्।
बिभ्राणा नवमौक्तिकाभरणसंराजत्कळां दीपिकां
शक्तिभ्यां उपसेवितां अनुदिनं सन्तानलक्ष्मीं भजे।।

549.कीर्तिलक्ष्मी ध्यानम्

पद्मस्था पद्मनेत्रा कमलयुगवराभीतियुग्मोस्सरोजाः
देहोत्थाभिः प्रभाभिः त्रिभुवनमखिलं भासुरा भासयन्ति।
मुक्ताहाराभिरामोन्नत कुचकलशा रत्नमञ्जीरकाञ्ची
ग्रैवेयोर्मङ्गदाड्या धृतमणिमकुटाश्रेयसे श्रीभवेद्वः।।

550.विद्यालक्ष्मी ध्यानम्

अम्बोजं जपमालिकां करतलैः कीरं तथा पुस्तकं
बिभ्राणां धवळां शुकवृततनुं ज्ञानप्रदामीश्वरीम्।

सौम्यां पूर्णसुदा करापवदनां रक्तारविन्दस्थितां
सर्वैः संस्तुतपादपद्मयुगळां विद्याख्यलक्ष्मीं भजे।।

551.धनलक्ष्मी ध्यानम्

कुम्भं चक्रशरौ करण्डधनुषी शङ्खाभये पङ्कजं
बिभ्राणां करपल्लवे सुरचिरां सन्दप्तहेमद्युतिम्।
सर्वैराभरणैर्विभूषिततनुं राजत्किरीटां सदा
मान्यां देववरैः धनश्रियमकं वन्देऽरविन्दस्थिताम्।।

552.धान्यलक्ष्मी ध्यानम्

राका चन्द्रसमानकान्तिमपितः शाल्यादिशस्यैः शुभैः
संवीतां कदळीद्रुमैः सरसिजे विभ्राजमानां मुदा।
सौवर्णाभरणोज्वलां करतलैः इक्षुं तथा पङ्कजं
बिभ्राणां वरदाभये शुभकरीं धान्यश्रियं नौम्यऽहम्।।

553.मेधालक्ष्मी ध्यानम्

अमलकमलसंस्था तद्रजः पुञ्जवर्णा
करकमलधुतेष्टा भीतियुग्मामबुजा सा।
मणिमकुटविचित्रालङ्कृता कल्पजातैः
भवतु भुवनमाता सन्ततं श्रीश्रियो वः।।

554.गजलक्ष्मी ध्यानम्

कान्त्या काञ्चनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्गजैः
हस्तोक्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियम्।

नानारत्नसमुज्वलां करलसत्पद्मां किरीटोज्वलां
क्षौमां बन्धनितं सबिम्बलसितां वन्देऽरविन्दस्थिताम्।।

555.वीरलक्ष्मी ध्यानम्

तप्तस्वर्णकान्तिममलां शङ्खं धनुश्चक्रकं
बिभ्राणां वरदाभये करतलैः शूलं कपालं शरान्।
वीर्याब्जैः विनुतां पटैस्तु समरे भक्त्या किरीटाञ्चितां
सिंहस्कन्दगतां नृपेन्द्रविनुतां वीरलक्ष्मीं भजे।।

556.विजयलक्ष्मी ध्यानम्

खड्गं खेट वराभयाङ्कुशचलत् पाशं वहन्तीं करैः
शङ्खं चक्रमतीव कोमलतनुं श्यामांश हंसस्थिताम्।
इन्द्राद्यैः द्विषत्कणैः अभिनुतां भूपा।भिवन्द्यां सदा
वन्देऽहं विजयां जयप्रददृशां सिंहासनाध्यासिनीम्।।

557.सौभाग्यलक्ष्मी ध्यानम्

अम्बोजे च वराभये करतलैः सम्बिभ्रतीं पूजितां
हस्ताभ्यां अरुणाम्भुजाभ नयनां श्वेताम्बरालङ्कृताम्।
भक्तानां सुखजीवनं शुभमतीं आयुश्च दीर्घां यशः
धातुं चापि कृताधरां शुभकरीं सौभाग्यलक्ष्मीं भजे।।

558.सौन्दर्यलक्ष्मी ध्यानम्

सिन्दूररत्नकान्तिः सरसिजवसतिश्चारुलावण्यभूमिः
हस्ताब्जैः रत्नपात्रं सरसिजयुगळं दर्पणं संवहन्ती

दासी निश्वाभिवीता मणिमयमकुटा हार सत्कुण्डलाढ्या
काळी प्रोद्यान्नितं साङ्गदलसितभुजा श्रेयसे वोऽस्तु लक्ष्मीः।।

559.सिद्धलक्ष्मी ध्यानम्

अभयवरदहस्ताम् अब्जयुग्मां दधानां
सरसकमलवासीं रत्नताटङ्कभूष्याम्।
अरुणसद्रशवर्णाम् अच्युतप्राणनाथां
सकलविबुधवन्द्यां सिद्धलक्ष्मीं नमस्ते।।

560.आरोग्यलक्ष्मी ध्यानम्

वन्दे पद्मकरां प्रसन्नवदनां सौभाग्यदां भाग्यदां
हस्ताभ्याम् अभयप्रदां मणिगणैः नानाविधैर्भूषिताम्।
भक्ताऽभीष्टफलप्रदां हरिहरब्रह्मादिभिस्सेवितां
पार्श्वे पङ्कजशङ्खपद्मनिधिभिर्युक्तां सदा शक्तिभिः।।

561.साम्राज्यलक्ष्मी ध्यानम्

अम्बोजे वरदाभये करतलैः संबिभ्रतीमिष्टदां
हस्ताभ्यां च सुवर्णकुम्भयुगले नाप्लाव्यमानां मुहुः।
शङ्खश्चामरधारिणीभिः अमरस्त्रिभिस्सुखं सेवितां
साम्राज्यप्रदवीक्षणां हृदि सदा श्रीराजलक्ष्मीं भजे।।

562.सरस्वती ध्यानम्

शुक्लां शुक्लाम्बरामक्षमाला पुस्तकधारिणीम्।
सव्यवामकराभ्यां च सुप्रसन्नां सरस्वतीम्।।

563. सरस्वती ध्यानम्

सरस्वतीं चतुर्हस्तां श्वेतपद्मासनस्थिताम्।
करण्डमकुटोपेतां मुक्तादिभिरलङ्कृताम्।।

564. भारती ध्यानम्

विद्यात्मानमशेषलोकजननीं देवीमिमां इष्टदाम्
आर्याकल्पितभूषितां त्रिनयनां वन्दे नवद्यां सदा।
भक्त्या नम्र सुरेन्द्र मौळि मकुटां प्रोन्मुक्त रत्नाङ्कुरां
छायारञ्जितपादपीठनिकटां इष्टार्थदां भारतीम्।।

565. सरस्वती ध्यानम्

हंसारूढां शोभनाङ्गीं हस्ते पुस्तकसंयुताम्।
विमलां वेदसंयुक्तां सरस्वतीं तां यजेत् क्रमात्।।

566. सरस्वती ध्यानम्

द्विनेत्रयुक्तैकमुखीं सुपीतां वराभयां गण्डिकसत् सरोजाम्।
हस्तैर्दधानां मृदुधौतवस्त्रां सरस्वतीं तां शरणं प्रपद्ये।।

567. गायत्री ध्यानम्

गायत्रीं काञ्चनाभासां करण्डमकुटान्विताम्।
वराभयाक्षमालां च गण्डिकां बिभ्रतीं करैः।
सर्वालङ्कारसंयुक्तां बद्धपद्मासनस्थिताम्।।

568. सावित्री ध्यानम्

चतुर्मुखी च सावित्री सर्वालङ्कारशोभिता।
उद्यत्सूर्यप्रभा देवी जटायज्ञोपवीतिनी।
दक्षे सृगक्षमाला च वामे दण्डकमण्डलुम्।
कोमळा हंसपद्मे च वासिनी सर्वभूषणी।।

569. विशालाक्षी ध्यानम्

चतुर्भुजां त्रिणेत्रां च जटामकुटमण्डिताम्।
सव्यहस्ते तु लिङ्गं स्यात् अक्षमाला विभूषिणीम्।।
गण्डिकां च गणेशञ्च वामहस्ते धरां शुभाम्।
सर्वलक्षणसम्पूर्णां विशालाक्षीं स्मराम्यहम्।।

570. द्विभुजशक्ति ध्यानम्

श्यामां विचित्रां द्विभुजां त्रिभङ्गीं सव्यापसव्यस्थित कुञ्चिताङ्घ्रिम्।
सव्योत्पलं वा कटकान्वितां वा हस्तावलम्बां परमेश्वरीं ताम्।।

571. द्वारशक्ति (विजया) ध्यानम्

द्विनेत्रां रक्तवर्णां च करण्डमकुटान्विताम्।
विजयां द्वारपालीं च पीतवस्त्रां चतुर्भुजाम्।।
ऊर्ध्वे तु डमरुं पाशं खड्गदण्डमधः करैः।।

572. द्वारशक्ति(जया) ध्यानम्

चतुर्भुजां द्विनेत्रां च करण्डमकुटान्विताम्।
पाशं डमरुकं चोर्ध्वे खड्गदण्डमधःकरैः।।

573. प्रच्छन्नपटाधिष्ठितशक्ति ध्यानम्

नीलवासिसमारूढां वस्त्रमाल्यविभूषणाम्।
निद्राच्छादित त्रैलोक्यां भजे खट्वाङ्गधारिणीम्।।

574. शक्ति चण्डेश्वरी ध्यानम्

द्विनेत्रां द्विभुजां श्यामां टङ्कं चैव तु धारिणीम्।
कटकं च विशेषेण व्याख्यामुत्रां तथैव च।।
द्विपादं वस्त्रसंयुक्तां ज्ञानरूपां तथैव च।
करस्फोटनमात्रेण शिवपूजाफलं भवेत्।।

575. ब्राह्मी ध्यानम्

वराभयां गण्डिकमक्षमालां हस्तैश्चतुर्भिर्दधतीं चतुर्मुखाम्।
पीताम्बरामष्टदृशीतसंस्थां ब्राह्मीं भजे पिङ्गजटासमेताम्।।

576. माहेश्वरी ध्यानम्

माहेश्वरीमेकमुखीं त्रिणेत्रां चतुर्भुजां भीतिवरेणटङ्काम्।
शुक्लां सुवस्त्रां वृषभस्थिताङ्घ्रिं भजे जटामण्डितमौळियुक्ताम्।।

577. कौमारी ध्यानम्

एकाननां द्वक्षियुतां सुकृष्णां वज्रं च शक्तिं वरदाभयं च।
हस्तैर्दधानां च मयूरसंस्थां कौमार्यभिख्यां मनसा स्मरामि।।

578. वैष्णवी ध्यानम्

चतुर्भुजामेकमुखीं त्रिणेत्रां वराभयां शङ्खमऽतुल्यचक्रम्।
हस्तैर्दधानां गरुडासनस्थां वैष्णवीं शक्तिमहं नमामि।।

579. वाराही ध्यानम्

क्रोडाननां रक्तरुचिं त्रिणेत्रां वराभयं वै मुसलं हलं च।
हस्तैर्दधानां मृगराजसंस्थां वाराह्यभिख्यां हृत्शक्तिमीडे।।

580. माहेन्द्री ध्यानम्

द्विलोचनामेकमुखीं च पीतां वज्रञ्च शक्तिं वरदाभयं च।
हस्तैर्दधानां गजवाहनस्थां माहेन्द्रभिख्यां मनसा स्मरामि।।

581. चामुण्डी ध्यानम्

प्रेतासनामेकमुखीं त्रिणेत्रां शूलं दधानां कटकञ्च धारिणीम्।
वरञ्च कालाम्बुदनीलवर्णां व्याख्याजिनां किङ्किणिमालयाढ्याम्।।

582. महामारी ध्यानम्

एकवक्त्रां त्रिणयनां चतुर्दोर्दण्डमण्डिताम्।
शूलं डमरुकं चैव कपालं खड्गमेव च।।
बिभ्रत्फुल्लनयनां सर्वाभरणभूषिताम्।
एवञ्च ध्यानमेवोक्तं महामारीं प्रभावयेत्।।

583. देवमारी ध्यानम्

उद्यत्सूर्यनिभां देवीं मकुटोज्वलकेशकाम्।
कपालपाशमेवं च दक्षिणे खड्गदण्डिनीम्।
सुदंष्ट्रां भीमवक्त्रां च पादपद्मासने स्थिताम्।।

584. अग्निमारी ध्यानम्

बालसूर्यप्रभाकारां करण्डमकुटान्विताम्।
अग्नीमार्याकृतं प्रोक्तं सर्वाभरणभूषिताम्।।

585. कौमारी ध्यानम्

नीलगात्रसमायुक्तां अग्निनेत्रोक्तरूपकाम्।
ज्वालाकेशोर्ध्ववक्त्रां च कपालं खेटवामके।।
सर्वाभरणसंयुक्तां कौमारीरूपमुच्यते।।

586. वीरमारी ध्यानम्

श्यामवर्णाकृतिं देवीं त्रिणेत्राञ्च चतुर्भुजाम्।
पाशशूलधरां युग्मे तत्परे स्रोणिदण्डकाम्।
पद्मासनस्थितां चैव केशबद्धाङ्गसुन्दरीम्।
एवं च ध्यानमेवोक्तं वीरमारीं प्रपूजयेत्।।

587. तोयमारी ध्यानम्

तोयमारीं सलिलाङ्गीं शुभ्रलोचनयुग्मकाम्।
सुधाकुम्भकराभ्यां च विचित्रां सर्वमङ्गलाम्।
कृष्णपिङ्गोर्ध्वकेशञ्च सर्वाभरणभूषिताम्।।

588. सरिमारी ध्यानम्

स्फटिकाभां सरिमारीं व्याळयज्ञोपवीतिनीम्।
कराभ्यां श्रीफलं चैव मकुटां कर्णपत्रकाम्।।
चित्रवस्त्रधरां देवीं चित्रमालाविभूषणाम्।
सर्वाभरणसंयुक्तां सरिमारीं प्रपूजयेत्।।

589. भद्रमारी ध्यानम्

वामोघ्नीं भद्रमारीं च पङ्कजासनवासिनीम्।
पद्मनेत्रां महाघोरां भद्रमारिष्याब्जधारिणीम्।।
कुण्डलं कर्णधारीश्च कोमलां च विभावयेत्।।

590. महामारी ध्यानम्

द्विनेत्रां चतुर्भुजां चैव रक्तवर्णां सुयौवनाम्।
खड्गं डमरुकं चैव मुक्तादामैरलङ्कृताम्।।

591. भूमिदेवी ध्यानम्

श्यामां विचित्रां नवरत्नभूषितां चतुर्भुजां तुङ्गपयोधरान्विताम्।
इन्दीवराक्षीं नवशाळिमञ्जरीं सुखं दधानां वसुधां भजामहे।।

592. द्विभुजकाळी ध्यानम्

रक्तवर्णं द्विनेत्रं च द्विपादं द्विभुजान्वितम्।
कपालं शूलहस्तं च रौद्रीं मकरधारिणीम्।।

593. द्विभुजकाली ध्यानम्

अतसीपुष्पसंकाशं द्विनेत्रं द्विभुजान्विताम्।
जटामकुटकाळी च हलामुसलधारिणीम्।।

594. चतुर्भुजकाळी ध्यानम्

ततो दुर्गां भगवतीं कृष्णाभां दुर्गरक्षणीम्।
चतुर्बुजां तथा कुर्यात् क्षौममद्यामलङ्कृताम्।
अस्यामायुधविन्यासां वासुदेवे यथा तथा।

पीतकौशेयवसनां पद्ममध्ये स्थितां शुभाम्।।
अथवा महिषमर्धनि पीटे सा स्थरणान्विते।।

595.चतुर्भुजकाली ध्यानम्

ध्यायेत्काली महादेवीं रत्नसिंहासनस्थिताम्।
पद्मासन सुखासीनां रक्तवस्त्रां चतुर्भुजाम्।
शूलं डमरुकं चैव कपालं पाशधारिणीम्।।
एवं ध्यायेत् रुद्राङ्गीं सर्वकामप्रसादिनीम्।।

596.चतुर्भुजकाळी ध्यानम्

एकवक्त्रां त्रिणयनां ऊर्ध्वकेशसमन्विताम्।
श्यामवर्णसमायुक्तां चतुर्दोर्दण्डमण्डिताम्।।
प्रसन्नवदनां देवीं दुकूलवसनान्विताम्।
शूलं डमरुकं चैव कपालं पाशमेव च।।
बिभ्रतीफुल्लनयनां नानाभरणभूषिताम्।
सर्वावयवसंयुक्तां सर्वावयवसुन्दरीम्।।
शयनं वामपादञ्च लम्बितं सव्यपादकम्।
दिव्यसिंहासनासीनं दिव्यमाल्यानुभूषिताम्।।

597.षड्भुजकाळी ध्यानम्

षड्भिश्शूलकपालपाशडमरु प्रासांसखेटान् करैः
बिभ्राणाधृतबालमौळिरुचिरप्रौढोत्तरा साङ्गिका।
रौद्रीं नित्यमवक्रहासनकदा बन्धूक रक्ताकृतिः
श्रीलप्ष्यत्यपीनकुचान् उदङ्मुखयुता काळी मळीजावतु।।

598.षोडशभुजकाळी ध्यानम्

नानाभाहेमवस्त्रानवक्रतिवसामांसनिर्भिन्नवक्त्रा
शूलं कुन्तं रथाङ्गं फणिमुसलगदां तोमरं भद्रुसञ्च।
पाशं शक्तिं च शङ्खं ध्वजहलदहनान् वज्रखेटं कराग्रैः
बिभ्राणाभीमवेषा विजयतु भुवने विश्रुता भद्रकाळी।।

599. अष्टादशभुजकाळी ध्यानम्

अष्टादशभुजा कार्या भद्रकाळी मनोहरा।
आलीटस्थानसंस्थाना चतुस्सिंहरथे स्थिता।।
अक्षमाला त्रिशूलञ्च गड्गा चर्मञ्च सर्वदा।
बाणचापौ च कर्तव्ये शङ्खपद्मे तथैव च ।।
स्रुक् स्रुवौ च तथा कार्यौ तथा दिव्यं कमण्डलुन्।
दण्डशक्तिश्च कर्तव्ये कृष्णाजिनं हुताशनौ।।
हस्तानां भद्रकाल्यास्तु भवेत्शान्तिकरो वरा।
एवं कार्या महाभागो रक्तपात्रधरा भवेत्।।

600.अथर्वणभद्रकाळी ध्यानम्

युद्धे भघ्नोरुकायं नरहरिवपुषं घण्टभेरुण्डरूपी।
भूत्वा खर्जन् तमघ्रे शरभ खगपतिः यस्सस्थ बालाग्नि कुण्डात्।
उग्र प्रत्यङ्गिराव्यां दशशतवदनां काळिकां आशुसृष्ट्या
तस्या जिह्वाग्र वह्निं सुश्रवत अनयत कुञ्चितांघ्रिं भजेऽहम्।।

601.दक्षिणकाळी ध्यानम्

शवारूढां महाभीमां घोरदंष्ट्रां हसन्मुखीम्।
चतुर्भुजां खड्गमुण्डवराभयकरां शिवाम्।।
मुण्डमालाधरां देवीं ललजिह्वां दिगम्बराम्।
एवं सञ्चिन्तयेत् काळीं श्मशानालयवासिनीम्।।

602.सीता ध्यानम्

सीतां कमलपत्राक्षीं विद्युत्पुञ्जसमप्रभाम्।
द्विभुजां सुकुमाराङ्गीं पीतकौशेयवासिनीम्।।

603.सीता ध्यानम्

या सीतावनिसम्भवातमिथिला पालेन संवर्तिता
पद्माक्षा नृपते सुतानलघता यामत् लिङ्गोद्भवा।
या रत्नालयमागता जलनिधौ या वेद पारङ्गता
लङ्कां सा मृगलोचना शशिमुखी मां पातु रामप्रिया।।

604.कृष्णवीर ध्यानम् (கருப்பா்)

नीलजीमूतसंकाशं खड्गखेटकधारिणम्।
कृष्णवीरस्वरूपन्तु दुष्टसंहारमर्दनम्।।

605.मुक्तालुरावुक्ति ध्यानम्

तप्तकाञ्चनसंकाशं योगसूत्रेणवेष्टितम्।
रुद्राक्षमालिकायुक्तं योगशम्भुमिति स्मृतम्।।

606.अङ्गरक्षकन् ध्यानम् (சின்னான்)

पीडिकाहस्तसंयुक्तं दण्डधारिं सुयौवनम्।
अङ्गरक्षकरूपं तु भावयेत् केरळोद्भवम्।।

607. बीडिशायुधारि ध्यानम् (தூண்டில்காரன்)

कृष्णाङ्गं घोरवक्त्रं कुटिलकचभरं साञ्जलीहस्तबद्धं
श्वानव्याघ्रादियुक्तं मदविटचरितं मध्यपाने प्रसन्नम्।
ध्यायेत् भस्मत्रिपुण्ड्राङ्कित सुविलसत् फालदेशोभियुक्तं
शास्तादूतं नराणां हितकरमपरं सर्वदुष्टापहारिम्।।

608.कात्तवरायस्वामि ध्यानम्

द्विपादन्तु त्रिभङ्गञ्च द्विहस्तं खड्गखेटकम्।
द्विनेत्रं क्रूरदंष्ट्रञ्च बद्धकेशाळकान्वितम्।
रक्तवर्णप्रभं देवं वायुनाथस्वरूपकम्।।

609.आर्यमाला ध्यानम्

पीताभां पीतवस्त्रां च सर्वाभरणभूषिताम्।
वामहस्तोरु संस्यात दक्षहस्ते तु पङ्कजम्।
सर्वाभरणसंयुक्तां विप्रकन्यां स्वरूपिणीम्।।

610.उकाक्षनायकी ध्यानम्

रक्ताभां रक्तवस्त्रां च त्रिभङ्गञ्च द्विपादिनीम्।
वामहस्तोत्पलं चैव दक्षहस्ते तु लम्बिताम्।
सर्वाभरणसंयुक्तां दैत्यकन्यास्वरूपकाम्।।

611.करुप्पर् ध्यानम्

कृष्णाभं कृष्णवस्त्रञ्च गदा खड्गधरं तथा।
द्विनेत्रं क्रूरदन्तञ्च महाघोरं महाबलम्।।
सशक्तिसहितं देवं कृष्णदेवस्वरूपकम्।।

612.मूकाम्बिका ध्यानम्

बालादित्य निभाननां त्रिणयनां बालेन्दुना भूषिताम्।
नीलाकारसुकेशिनीं सुललितां नित्यान्नदानप्रियाम्।
शङ्खचक्रवराभयां च दधतीं सारस्वतार्थप्रदाम्
तां बालां त्रिपुरीं शिवेन सहितां ध्यायामि मूकाम्बिकाम्।।

613.सिंहराज ध्यानम्

श्वेतवर्णं सुवृत्ताक्षं वक्रदन्तं महाबलम्।
जटाभारसमायुक्तं लाङ्गूलेन समन्वितम्।।
पञ्चास्यञ्च चतुष्पादं सिंहराजमहं भजे।।

614.आञ्जनेयस्वामि ध्यानम्

सिन्दूरारुणविग्रहं द्विनयनं भक्तेष्टदानं वरं
सीतारामहृदिस्थितं अभयदं लोकैकचूडामणिम्।
भूतप्रेतग्रहादिसमस्तदोषनिश्चयसंसचूर्णतां द्वेषणं
सीतान्वेषण तत्परं कपिवरं श्रीआञ्जनेयं भजे।।

615.धन्वन्तरी ध्यानम्

नमामि धन्वन्तरिमादिदेवं सुरासुरैर्वन्दितपादपद्मम्।
लोके ज्वरारुग् भयमृत्युनाशं धातारमीशं विविधौषधीनाम्।।

असिर्बभूव कलशं तदर्णवाद्यः पीयूषपूर्णं माध्वकृते कराणाम्।
रूग्जालजीर्ण जनता जनितपरशंसः धन्वन्तरिः सभगवान् पविकाय भूयात्।।

616.द्रौपति ध्यानम्

द्रौपती राजात्मजां देहं द्विनेत्रां युग्मपाणिकाम्।
लम्बितं वामहस्तन्तु दक्षिणस्ताम्बुजं शुकम्।
धर्मालंकेशसंयुक्तां करण्डमकुटान्वितम्
कुञ्चितं दक्षपादन्तु वामपादतले स्थिताम्।
पाण्डवानां पतिस्तुत्वा पतिं एकाहवत्सरम्।।
वत्सरान्ते अग्निकुण्डन्तु उत्सवं दिव्यरूपिणीम्।।

617.अर्जुन ध्यानम्

मरकतमणिवर्णं कोटिसूर्यप्रकाशं
धृतवरकरबाणं कार्मुखं वामहस्ते।
गिरिरिपुधरसूनुं कृष्णसारथ्ययुक्तं
बलरिपुकुलहन्तं फल्गुनं भावयामि।।

618.नकुल ध्यानम्

अश्विनीदेवपुत्रं स्यात् हयारूढसमन्वितम्।
रक्तवर्णसुदीप्ताङ्गं राजलक्षणसंयुतम्।
शुक्लयज्ञोपवीतञ्च द्विनेत्रं द्विभुजं तथा।
शुभ्राम्बुजध्वजैर्युक्तं स्वर्णकञ्चुकमेव च।
केशबद्धसमायुक्तं शिरोवस्त्रविभूषितम्।
नानाभरणसंयुक्तं नकुलराजमहं भजे।।

619.सहादेव ध्यानम्

रक्तवर्णसमायुक्तं कवचं केशबन्धनम्।
पुस्तकं वामहस्ते तु कोमळं वदनाम्बुजम्।
स्वर्णध्वजसमायुक्तं शुक्लयज्ञोपवीतिनम्।
सर्वाभरणसंयुक्तं सहादेवमहं भजे।।

620.सुन्दरमूर्ति ध्यानम्

जम्बूग्रामसमुद्भवं शिवपदं ध्यानप्रतापोज्वलम्।
लीलाभण्डुधरं प्रकामपरवा कल्याणपाणिग्रहम्।
नानाकारशिवालय स्तुतिकरं सौन्दर्यरत्नाकरं
वन्दे सुन्दरमिष्टकान्तिवदनं त्यागेशशम्भुप्रियम्।।

621.गज ध्यानम्

गजेन्द्रं प्रणवाकारं चतुष्पादविराजितम्।
कृष्णवर्णं महास्थूलं पुच्छाग्रे रोमसम्युतम्।।
ह्रस्वनेत्रे शूर्पश्रोत्रे तुण्डशुण्डेन शोभितम्।
सुदीर्घदन्तयुग्मे च घण्टारवसमन्वितम्।।

622.सूर्य ध्यानम्

सौरं कुङ्कुमसंकाशं रत्नाभरणभूषितम्।
माणिक्कमकुटोपेतं रक्तपुष्पैरलङ्कृतम्।।
चतुर्भुजसमोपेतं पद्मद्वयकरान्वितम्।
अभीतिवरदोपेतं प्रभामण्डलमध्यकम्।।

623.चन्द्र ध्यानम्

सोमं चतुर्भुजं श्वेतं केयूरमकुटोज्वलम्।
अभयं वरदोपेतं कुमुदद्वयहस्तकम्।।
वासुदेवस्य नयनं शङ्करप्रियभूषणम्।
कृत्तिकारोहिणीपार्श्वं प्रभामण्डलमध्यकम्।।

624. अङ्गारक ध्यानम्

नमाम्यङ्गारकं देवं रक्ताङ्गं च चतुर्भुजम्।
शक्तिशूलगदाभीतिं प्रवाळमकुटोज्वलम्।।
प्रवाळं भूषिताङ्गं च रक्तवस्त्रन्तु धारिणम्।
रक्तमाल्यानुशोभाढ्यं रक्तमेषञ्च वाहनम्।।

625.बुध ध्यानम्

बुधं च नमदां सौम्यं कुङ्कुमाभं चतुर्भुजम्।
खड्गशूलगदापाणिं वरदाङ्कितमुद्रितम्।
पीताम्बरधरं देवं पीतमाल्यानुशोभितम्।
मरकाभरणं चैव जानानन्दमयं शुभम्।।

626. गुरु (बृहस्पति) ध्यानम्

तप्तकाञ्चनवर्णाभं चतुर्भुजसमन्वितम्।
दण्डाक्षसूत्रमालाञ्च कमण्डलुवरं तथा।।
पीताम्बरधरं देवं पीतगन्धानुलेपनम्।
पुष्यरागमयं भूष्यं कृपामूर्तिं गुरुं भजे।।

627.शुक्र ध्यानम्

शुक्रं चतुर्भुजं देवं अक्षमाला कमण्डलुम्।
दण्डहस्तं च वरदं शुक्लाम्बरधरं विभुम्।।
वज्रमाभरणं चैव किरीटमकुटोज्वलम्।
सर्वशास्त्रार्थदं देवं भार्गवं दैत्यमन्त्रिणम्।।

628.शनैश्चर ध्यानमम्

चतुर्भुजं शनिं देवं चापं बाणं कृपाणकम्।
वरदं भीमदंष्ट्रञ्च नीलाङ्गं नीलवाससम्।।
नीलरत्नमलङ्कृत्य नीलोत्पलधरं शुभम्।
सर्वपीडाहरं देवं गृहाण मुक्तमोमाक्तमम्।।

629.राहु ध्यानम्

राहुं द्विभुजं देवं कृताञ्जलिकरं शुभम्।
कृष्णाम्बरधरं माल्यं कृष्णगन्धानुलेपनम्।।
गोमेधकविभूषाढ्यं विचित्रमकुटोज्वलम्।
कृष्णसिंहासनं देवं भक्तानामिष्टदायकम्।।

630.केतु ध्यानम्

सर्पग्रीवं द्विनेत्रञ्च द्विभुजाञ्जलिहस्तकम्।
वैडूर्य माभरणं चैव चित्रवस्त्रेण धारिणम्।
विचित्रमकुटोपेतं रक्तपुष्पेणशोभितम्।
ज्ञानमोक्षप्रदं केतुं ज्ञानसिद्धि प्रदायकम्।।

631.पृथ्वीतत्त्व ध्यानम्

पृथिवी चतुरश्रन्तु सर्वाधारसमन्वितम्।
अपाद्याये संयुक्तं पदार्थ भावनं स्मरेत्।।

632.अप्तत्त्व ध्यानम्

अर्धचन्द्रसमाकारं चतुर्गुणसमन्वितम्।
अग्न्यादि षट्पदार्थानां आधरत्वं विभावयेत्।।

633.अग्नितत्व ध्यानम्

त्रिकोणस्य श्च मध्ये तु तेजस्तत्वं विभावयेत्।
गुणत्रयसमायुक्तं वाय्वाद्याधारभूतकम्।।

634.वायुतत्त्व ध्यानम्

वायुश्च स्फटिकाभासं षडश्रोपरिसंस्थितम्।
द्विगुणेन समायुक्तं व्योमाद्याधाररूपिणम्।।

635.आकाशतत्त्व ध्यानम्

आकाशं स्फटिकाभासं वृत्ताकारं मनोहरम्।
सौम्यादि यजमानान्तं नत्वाधारं विभावयेत्।।

636.ईशान ध्यानम्

शुद्धस्पटिकसंकाशं शुभवक्रं त्रिलोचनम्।
अभयं वरदं चैव वज्रशूलधरं शिवम्।।
श्वेतवस्त्रपरीताङ्गं श्वेतमाल्यैर्विभूषितम्।
नागाभरणसंयुक्तं ऊर्ध्वमीशानकं भजे।।

637.तत्पुरुष ध्यानम्

पुरुषं कुङ्कुमाकारं वरदाभीतिहस्तकम्।
खड्गं परशुसंयुक्तं जटामकुटशोभितम्।
रक्तवस्त्रपरीताङ्गं रक्तपद्मोपशोभितम्।
नेत्रं मूलसमं सौम्यं पूर्वास्यं पुरुषं भजे।।

638.आघोर ध्यानम्

अघोरमञ्जनाभासं वहन्तं वह्निडिन्डिमम्।
वराभयकरं दंष्ट्रं भीमवक्त्रं महोज्वलम्।।
नीलवस्त्रपरीताङ्गं नीलोत्पलविभूषितम्।
ज्वालाकेशोग्ररूपञ्च वीरासनसमन्वितम्।।

639.वामदेव ध्यानम्

वामदेवं महादेवं वरदाभयहस्तकम्।
नागं घण्टारवोपेतं रक्ताङ्गं रक्तलोचनम्।।
सर्वाभरणसंयुक्तं सर्वमाल्यैर्विभूषितम्।
रुचिरासनमासीनं उत्तराभिमुखं स्मरेत्।।

640.सद्योजात ध्यानम्

सद्योजातञ्च गोक्षीरसंकाशमतिसुन्दरम्।
वरदाभयहस्तञ्च पाशाङ्कुशधरं तथा।।
सर्वलक्षणसंयुक्तं सर्वमाल्यैर्विभूषितम्।
पद्मासने समासीनं पश्चिमाभिमुखं भजे।।

641.विद्यादेह ध्यानम्

विद्यादेहं हृदाकाशे उद्यत्सूर्यसमप्रभम्।
हृदयाम्बुजमध्यस्थं धर्माधर्मस्वरूपकम्।।
अष्टबाहुं त्रिणेत्रञ्च अष्टाष्टकलशोभितम्।
भावयेत्सर्वतोवक्त्रं योगमासनसंस्थितम्।।

642.अलुप्तशक्तिरूप नेत्र ध्यानम्

निर्मलं नेत्ररूपञ्च नित्यं श्यामाब्जसन्निभम्।
शूलाभये सव्यहस्ते वामे वरकपालके।।
श्यामवस्त्रपरीताङ्गं नीलोत्पलविभूषितम्।
सौम्यास्यं सौम्यरूपञ्च पीताम्बरविभूषितम्।।

643.सर्वव्रतारूप हृदय ध्यानम्

हृदयं शुक्लवर्णाभं त्रिणेत्रं एकवक्त्रकम्।
शूलाभये सव्यहस्ते वामे वरकपालके।।

644.नित्य अप्ति रूप शिरो ध्यानम्

शिरः काञ्चनवर्णाभं एकवक्त्रं त्रिलोचनम्।
शूलाभये दधानञ्च कपालं वरमेव च।
जटामकुटशोभाढ्यं भस्मपाण्डरविग्रहम्।।
सर्वाभरणसंयुक्तं सर्वमाल्यैरलङ्कृतम्।।

645.अनादिबोध शिखा ध्यानम्

शिखां सिन्दूरवर्णाभं शुक्लवस्त्रोत्तरीयकाम्।
त्रिणेत्रां जटिलां सव्ये कपालं वरमेव च।।
शूलाभये दधानाश्च वामे रुद्राक्षभूषिताम्।
सर्वाभरणसंयुक्तां सर्वमाल्यैर्विभूषिताम्।।

646.स्वतन्ता रूप कवच ध्यानम्

कवचं शुभ्रवर्णाभं एकवक्त्रं चतुर्भुजम्।
वरं कपालं वामे च शूलाभयं च सव्यके।।
बिभ्राणं शूलनेत्रश्च भस्मरुद्राक्षभूषितम्।
सर्वाभरणसंयुक्तं सर्वमाल्यैरलङ्कृतम्।।

647.अनन्तशक्तिरूप अस्त्र ध्यानम्

अस्त्रं कृष्णधनुःप्रोक्तं दक्षे चाभयशूलकम्।
वरं कपालं वामे च जटामकुटशोभितम्।।
दीर्घदन्तं भीमवक्त्रं त्रिणेत्रं रक्तवाससम्।।
सशक्तिसहितेनैव सादाख्य पूजयेत् गुरुः।।

648.धर्मपुत्र ध्यानम्

सत्यज्ञानमनन्तमाद्यमधिकं कालस्य पुत्रं प्रभुम्।
वन्दे सर्वमनोज्ञभीष्टमभयं धर्मं सदा चिन्तयेत्।।

649.भीम ध्यानम्

भीमं सर्वसमानमधिकं माता पनातारकम्।
दण्डं हस्तसमस्तमर्दनगुणं ईशं सदा पूजितम्।।

650.अर्जुन ध्यानम्

अर्जुनो शत्रुनाशाय धनुर्हस्ताय चिन्तयेत्।
सायुधं च गुणं नित्यं किरीटी सव्यशायिनम्।।

651.नकुल ध्यानम्

नकुलो अश्वशास्त्राय भ्राताभीष्टवरप्रदम्।
सर्वलोकशरण्याय विष्णुरूपाय ते नमः।।

652.सहादेव ध्यानम्

सहादेवो ज्योतिस्शास्त्र तत्वज्ञानसदाजपम्।
हरिकीर्तनसन्तुष्टो पाण्डुपुत्राय नमो नमः।।

653.द्रौपती ध्यानम्

पाञ्चाले पतिपञ्चके प्रियमनः पद्मासने संस्थिताम्।
सर्वालङ्कारयुक्तां सततमभयदां द्रौपतीं क्लीं नमस्ते।।

654.परवै नाच्चियार् (सुन्दरर् पत्नी) ध्यानम्

द्विनेत्रां द्विभुजां श्यामां सुप्रसन्नां सुयौवनाम्।
दक्षिणे लम्बहस्ताञ्च वामहस्ताम्बुजां धृताम्।।
सुन्दरस्य सव्यभागे तु परवयां पूजयाम्यहम्।।

655.शङ्कलिनाच्चियार् ध्यानम्

द्विनेत्रां रक्तवर्णाञ्च करण्डमकुटान्विताम्।
सव्यहस्तोत्पलं चैव वामहस्तप्रलम्बिनीम्।।
सुन्दरस्य वामभागे तु शङ्कल्यां पूजयाम्यहम्।।

656.मधुरवीरन् ध्यानम्

द्विपादं च त्रिपङ्गश्च द्विहस्तं खड्गखेटकम्।
द्विनेत्रं क्रूरदंष्ट्रश्च बद्धकेशोळकान्वितम्।।
रक्तवर्णप्रभं देवं मधुरवीरमहं भजे।।

657.श्वेतनायकि ध्यानम् (வெள்ளையம்மாள்)

पीताभां रक्तवस्त्राश्च सर्वाभरणभूषिताम्।
वामहस्तोरु स्यात् दक्षहस्ते तु पङ्कजम्।।
मधुरवीरप्रियां देवीं श्वेतनायकिमहं भजे।।

658.पोम्मि नायकि ध्यानम्

श्यामाभां पीतवस्त्राश्च त्रिभङ्गश्च द्विहस्तकाम्।
वामहस्तोत्पलं चैव दक्षहस्ते तु लम्बिताम्।।
सर्वाभरणसंयुक्तां पोम्मिदेविमहं भजे।।

659.स्वयंवरपार्वती ध्यानम्

बालार्कायुतसुप्रभां करतले रोलम्बमालाकुलाम्।
मालां सङ्गतीं मनोहरतनुं मन्दस्मितोत्यन्मुखीम्।
मन्दं मन्दमुपेयुषीं वरयितुं शम्भुं जगन्मोहिनीं
वन्दे देवमुनीन्द्रवन्दितपदां इष्टार्थदां पार्वतीम्।।

660.पुळिन्दिनी ध्यानम्

भर्हापीटकचाभिरामचिकुरां बिम्बोज्वलत्त्चन्द्रिकाम्
कुञ्जाहारलतां शुजालविलसत् ग्रीवां अतिरेक्षणाम्।

माकन्दद्रुमपल्लवारुणपटां अर्धेन्दु बिम्बाननां
देवीं दिव्यमयीं प्रसन्नहृदयां वन्दे किराताधृताम्।।

661. द्वादशभुज दुर्गा ध्यानम्

शङ्खं चक्रमसिं च चर्मसचरं चापं गदाशूलकम्।
बिभ्राणां वरदाभयामृतघटान् रत्नौघपात्रं तथा।।
भूषाभिर्मकुटादिभिस्त्रिनयनां पीताम्बरामम्बिकाम्
वन्दे चन्द्रकलान्वितां सुरगणैर् जगन्मङ्गळाम्।।

662.प्रतिक्रियाशूलिनि ध्यानम्

संवर्तानलकोटि कोटि विलसत् तेजोमयीं भीषणां
वीराभिः परिवारिताभि तो वीरैर्ग्रसन्दीं कृतिम्।
नानामूर्तिमहाप्रयोगनिपुणैर्विघ्निः प्रयुक्तां बुधः
तानेवाऽशुभनाशिनीं भयहरां वन्दे महाशूलिनीम्।।

663.अथर्वणभद्रकाळी ध्यानम्

वन्दे समस्तशत्रुघ्नीं सर्वसौख्यदयालयाम्।
कालीं कङ्काळवदनां कालजीमूत सन्निभाम्।।
भीमदंष्ट्रां ज्वलन्नेत्रीं भूयो ज्वालाशिखोज्वलाम्।
अष्टनागकृताकल्पां अष्टदिक्पूर्णविग्रहाम्।।
सहस्रभुजदण्डोद्य यत्सहस्रायुधशोभिताम्।
बिभ्रतीं किङ्किणीमालां अपातललम्बिकाम्।।
समस्तशत्रुरुधिरपानोन्मत्तां परांशिवाम्।।

664.वाराहि ध्यानम्

वन्दे वराहवक्त्रां वरमणिमकुटां विद्रुमश्रोत्रभूषाम्
हारग्रैवेयतुङ्गस्तनपरनमितां पीतकौशेयवस्त्राम्।
देवीं दक्षोर्ध्वहस्ते मुसलमदवरं लाङ्गलं वा कपालं
वामाभ्यां धारयन्तीं कुवलयकलितां श्यामलां सुप्रसन्नाम्।।

665.वाराहि ध्यानम्

उद्धृत्तोद्वान्दरत्नप्रभनयनयुगद्वन्द्वनिर्यत्कृशानोः
ज्वालामालातिभीमां विकटतरकरालोग्र दीक्षणाग्र तुण्डाम्।
पक्षाक्षोपप्रचण्डानिलचटुलजलद्राविताराादि सेङ्काशां
दुर्गां भिन्नाञ्जनाभां करतरनकरां पक्षिरूपां नमामि।।

666.मञ्चमाता ध्यानम्

द्विभुजां चारुवदनां सुस्तनां च सुयौवनाम्।
हरिद्रवसनां शान्तां किञ्चित् नेत्राम् प्रहासिताम्।
सर्वाभरणसंयुक्तां शबरिगिरिवासिनीं
करण्डमकुटोपेतां मञ्चमाता नमाम्यहम्।।

667.धूमावती ध्यानम् (ज्येष्ठा)

वन्दे कालाभ्रनीलां विवलितवदनां काकनासाक्षिकण्ठां
सम्मार्जन्युल्कशूर्पैर्युतमुसलकरां वक्रदन्तां विशास्याम्।
ज्येष्ठां निर्वाणवेषां भ्रकुटितनयनां मुक्तकेशामुतारां
शुष्कोत्तुङ्गादि.तिर्यक् स्तनपरयुगलां निक्प्रभां शत्रुहन्त्रीम्।।

668.अपवातहरादुर्गा ध्यानम्

अपवातहरा क्रूरा परिकासिकराम्बुजा।
सर्वारि हृदयक्षोपकारिणी पातिसर्वदा।।

669.कन्याकुमारी ध्यानम्

एकवक्त्रां द्विनयनां कारुण्यवदनाम्बुजाम्।
दक्षहस्तेक्षमालां च ऊरुहस्ते तु वामतः।।
सर्वालङ्कारसंयुक्तां भक्तानुग्रहकारिणीम्।
सदा ध्यानपरां देवीं ध्यायेत्कन्याकुमारिकान्।।

670. रेणुकादेवि ध्यानम्

ध्यायेन्नित्यमपूर्ववेषललितां
कन्दर्पलावन्यतां देवीम् देवगणैरुपास्यचरणाम्
कारुण्य रत्नाकराम् । लीलाविग्रहिणीम्
विराजितबुजाम् सच्चन्द्रहासादिमिः
बक्तानन्ह बिधायिनीम् प्रमुदिवाम्
नित्योत्सवाम् रेणुकाम् ।।

671.त्रिपुरभैरवी ध्यानम्

आधारार्कायुताभां कलितशशिकलाराजितप्तां त्रिणेत्रां
देवीं पूर्णेन्दुवक्त्रां विदृतजपवटी पुस्तकाभीत्यभीष्टाम्।
पीनोत्तुङ्गस्तनार्तां वलिलसितविलघ्नां असृक् पङ्कराजन्
मुण्डसृज्मण्डिताङ्गीं अरुणयातुकूलानुलेपां नमामि।।

672.भ्रमरदुर्गा ध्यानम्

शङ्खं चक्रं कपालं त्रिशिकरमुसलौ तर्जनीं चापपाणौ
बिभ्राणां बाहिदण्डैः शिशितलविलसत्पिङ्गकोटीरभाराम्।
देवीं दिव्याङ्गरागां विकटमुखलसत् घोरदंष्ट्रां त्रिनेत्राम्
दुर्गां भोगीन्द्रभूषां मुनिविबधनुतां घोररूपां नमामि।।

673.सुवासिनी ध्यानम्

सौम्यां रूपविलासिनीं गुणवतीं सौन्दर्यसीमन्तिनीम्।
नानाभूषणशोभिनीं स्मितमुखीं ताटङ्कभूषोज्वलीम्।
क्षौमालङ्कृतवस्त्रकञ्चुकवतीं माङ्गल्यसूत्रोज्वलां
वेणीनूपुरलालिनीं सुतिलकां प्रणमामि सुवासिनीम्।।

674.दत्तात्रेय ध्यानम्

दत्तात्रेयं शिवं शान्तं इन्द्रनीलनिभं विभुम्।
आत्ममायरतं देवं अवदूतं दिगम्बरम्।।
भस्मोद्धूलित सर्वाङ्गं जटाचूटधरं विभुम्।
चतुर्बाहुं उदाराङ्गं प्रफुल्लकमलेक्षणम्।
ज्ञानयोगनिधिं विश्वगुरुं योगिजनप्रियम्।
भक्तानुकम्पिनं सर्वसाक्षिणं सिद्धसेवितम्।।

675.दत्तात्रेय ध्यानम्

दत्तात्रेय हरे कृष्ण उन्मत्त आनन्ददायक।
दिगंबरमुनैपाल प्रकाशज्ञानसागरः।।

676.महावीर ध्यानम्

एकवक्त्रं रक्तनेत्रं खड्गखेटकसंयुतम्।
उग्ररूपं महाकायं महावीरमहं भजे।।

677.अश्व ध्यानम्

चतुष्पादं दीर्घदेहं केशपुच्छसमन्वितम्।
अतिवेगसमायुक्तं अश्वराजमहं भजे।।

678.इडुम्ब ध्यानम्

अगस्त्यवाक्यात् शिवगिरीं बाहुवाहसुपादके।
नीत्वा फलं त्वनिति क्षेत्रे श्रीधेनुरविपूजिते।।
भूमौ संस्थाप्य वसतं गुह भक्तिपरं वरम्।
कृष्णवर्णं महाकायं दण्डहस्तं भयानकम्।।
भक्तानामिष्टदं दैत्यं इडुम्बभक्तमहं भजे।।

679.नागकन्या ध्यानम्

जपाकुसुमप्रभां कनकचारुरक्ताम्बराम्।
ज्वलत्भुजकभूषणां परिलसत् मणिद्योदिताम्।।
वराभयकरद्वयां कनककुम्भतुङ्गस्तनीं स्मरामि ।
विषनाशिनीं मनसि नागकन्याकां भजे।।

680.हरियङ्काळी ध्यानम्

अञ्जनाचलनिभत्रिलोचनां तां सेन्दुखण्डविलसत् कपर्दिकाम्।
प्रेतारूढगुणवत् कपालिकां खड्गशूलगदाद्यारियङ्काळिकाम्।।

681.महिषमर्दिनी ध्यानम्

गरुडोत्पलसन्निभां मणिमौळिकुण्डलमण्डिताम्।
नौमि फालविलोचनां महिषोत्तमाङ्गनिषेतुषीम्।।
शङ्खचक्रकृपाणचापदधतीं चतुर्भुजां वन्दे
दुष्टमरूरिकादिविभदां संहारिणीमीश्वरीम्।।

682.नागयक्षिणी ध्यानम्

गात्रं यस्याः सुनेत्रं जलताकपरीवारमाकल्पजालैः
राजस्कं पीन्द्रकुम्भस्तनपरयुगलं मञ्जुमञ्जीरनाथैः।
नागानातायबाणौ नगनगां त्रिणेत्रलीलाविलासैः
सा लक्ष्यानागयक्षी कलयति कुशलं नागराजं प्रिया नः।।

683.पुलिन्दिनी ध्यानम्

पर्हापीडकचामचिकुरां बिम्बोल्लसत्चन्द्रिकां
कुञ्जाहारलतांशु जालविलसत् ग्रीवामातिरेक्षणाम्।
माकन्दद्रुम पल्लवारुणपटां अर्धेन्दु बिम्बाननां
देवीं सर्वमयीं प्रसन्नहृदयां ध्यायेत्किरातामुमाम्।।

684.रेणुका ध्यानम्

वामे शूलकपालयुग्ममितरे खड्गं क्वणड्डिण्डिमम्।
बिब्राणां करपङ्कजे त्रिणयनां नागाष्टभूषोज्वलाम्।।
नानाकोटियुगान्तसूर्यसदृशीं नानाज्वलत्भूषणां
दक्षालम्बितवाममुद्रितपदां श्रीरेणुकां भावयेत्।।

685. शक्यायुध ध्यानं

अग्रेश्वक्थ दल प्रकाशसहितम्
नाळाकृतिम् बास्वरम्, देवाराधिनिबर्हणम्
त्रिणयनम् देवैस्सदा पूजितम्
सुब्रह्मण्यकांबुजप्रविलसत्
ज्योतिर्मयम् स्वस्थिरम् ज्ञानस्योत्तरशात्क
संयुत महा शकयायुधम् मावथेत् ।।

686.नववीराणां नामानि

प्रथमं वीरबाहू च द्वितीयं वीरकेसरीम्।
तृतीयं वीरसिंहं च चतुर्थं वीरधीवरम्।।
पञ्चमं वीरमार्ताण्डं षष्ठं वीरान्तकं तथा।
सप्तमं वीरराक्षसं चैवाष्टमं परमेश्वरनाम च।।
नवमं पुरन्दरं चेत्याताः नववीरकम्।।

687.वीरबाहु ध्यानम्

वन्दे रक्तवर्णाभं माणिक्कवल्लीतनूभवम्।
खड्गखेटकसंयुक्तं वीरबाहुं गुहप्रियम्।।

688.वीरकेसरी ध्यानम्

सिन्धूरवर्णं देवेशं खड्गखेटकपाणिनम्।
वैडूर्यवल्लीतनुजं भजामि वीरकेसरीम्।।

689.वीरसिंह ध्यानम्

खड्गखेटकसंयुक्तं पीतवर्णं गुहानुजम्।
मरकतवल्लीप्रियं वीरसिंहमहं भजे।।

690.वीराधिवीर ध्यानम्

पुष्परागतनूजाङ्गं खड्गखेटकपाणिनम्।
श्वेतवर्णं देवेशं वीराधिवीरमहं भजे।।

691.वीरमार्ताण्ड ध्यानम्

वीरमार्ताण्डदेवेशं खड्गखेटकपाणिनम्।
नीलवल्लीतनूजाङ्गं कृष्णवर्णमहं भजे।।

692.वीरान्तक ध्यानम्

वीरान्तकं रक्तवर्णं खड्गखेटकपाणिनम्।
प्रवाळवल्लीतनुजं स्कन्दानुजमहं भजे।।

693.वीरराक्षस ध्यानम्

गोमेधवल्लीतनुजं पीतवर्णं सुयौवनम्।
वीरराक्षसदेवेशं खड्गखेटकपाणिनम्।।

694.वीरपरमेश्वर ध्यानम्

श्वेतवर्णं महादेवं खड्गखेटकपाणिनम्।
मौक्तिकवल्लीतनुजं परमेशमहं भजे।।

695.वीरपुरन्दर ध्यानम्

स्फटिकवर्णं देवेशं खड्गखेटकपाणिनम्।
वज्रवल्लीतनुभवं पुरन्धरमहं भजे।।

696.गङ्गा ध्यानम्

मकरासन गां गङ्गां सव्यवामकरद्वये।
नीलोत्पलं पूर्णकुम्भं दधतीं शुक्लरूपिणीम्।।

697.यमुना ध्यानम्

कृष्णवर्णं महादेवीं सर्वाभरणभूषिताम्।
मकरवाहनसंयुक्तां यमुनां पूजयाम्यहम्।।

698.गोदावरी ध्यानम्

सितवर्णं विशालाक्षीं पद्मद्वयकरान्विताम्।
गोदावरीं महाशक्तिं सर्वालङ्कारशोभिनीम्।।

699.सरस्वती ध्यानम्

अन्तर्वाहिनीं देवीं अक्षमालाधरां शिवाम्।
शुद्धस्फटिकसंकाशां सरस्वतीं पूजयाम्यहम्।।

700.नर्मदा ध्यानम्

मत्स्यवाहनसंयुक्तां महापापनिवारिणीम्।
शुद्धस्फटिकवर्णाङ्गीं नर्मदां पूजयाम्यहम्।।

701.सिन्धु ध्यानम्

सिन्धूरवर्णाममलां सर्वाभरणभूषिताम्।
पद्मोत्पलधरां देवीं सिन्धुदेवीं नमाम्यहम्।।

702.कावेरी ध्यानम्

अगस्त्यकमण्डलुभां अब्जयुग्मां शुभप्रदाम्।
समुद्रकामिनीं देवीं कावेरीं प्रणमाम्यहम्।।

703.पतञ्जलि ध्यानम्

पीतवर्णं द्विनेत्रं च द्विभुजाञ्जलिहस्तकम्।
योगरूपसमायुक्तं जटामण्डितशेखरम्।।
कर्णकुण्डलभूष्यन्तु त्रिपुण्ड्रेणविराजितम्।
देहार्धं ऋषिरूपन्तु पतञ्जलिमिति स्मृतम्।।

704.व्याघ्रपाद ध्यानम्

द्विभुजाञ्जलिहस्तं च जटा मण्डितशेखरम्।
योगरूपसमायुक्तं त्रिपुण्डेण विराजितम्।।
रक्तवर्णं द्विनेत्रं च पीताम्बर धररान्वितम्।
देहार्धं ऋषिरूपन्तु व्याघ्रपादमिति स्मृतम्।।

705.महामाया ध्यानम्

नीलवर्णा स मारूढां पुष्पमाला विराजिताम्। (समारूढां)
निद्रानिश्चलतां लोकां खड्गखेटकधारिणीम्।।
करण्डमकुटोपेतां भस्मरुद्राक्षभूषिताम्।
सर्वाभरणसंयुक्तां महामाया स्वरूपिणीम्।।

706.गरुड ध्यानम्

अमृतकलशहस्तं कान्तिसंपूर्णदेहम्।
सकलविबुधवन्द्यं वेदशास्त्रैरविद्यम्।
कनकरुचिरपक्षे स्तूयमानाण्डकोलं
सकलरिपुविनाशं चिन्तयेत्पक्षिराजम्।।

707.शौडाम्बा ध्यानम्

एकवक्त्रां द्विनयनां चतुर्हस्तसमन्विताम्।
ऊर्ध्वहस्ते पाशचक्रं अधरे वरदशूलिनीम्।
सिंहासनमहारूढां प्रसन्नवदनेक्षणाम्।।
रक्तवस्त्रपरीधानां देवाङ्गकुलरक्षणीम्।
सर्वाभरणसमायुक्तां चौडाम्बां सर्वसिद्धये।।

708.ऐय्यप्पस्वामि ध्यानम्

एकवक्त्रं द्विनेत्रं च करण्डमकुटान्वितम्।
चिन्मुद्रां दक्षिणे हस्ते वामे तु गजहस्तकम्।।
उद्धटितं योगपट्टञ्च द्विपादं पद्मसंस्थितम्।
सर्वालङ्कारसंयुक्तं प्रभामण्डलमण्डितम्।।
ज्ञानयोगमहाशास्ता भक्ताभीष्टवरप्रदम्।।

709.सहस्रवक्त्र वीरभद्र ध्यानम्

वीरभद्रं रुद्ररूपं शिवनेत्रसमुद्भवम्।
सहस्र शिरोथवक्त्रं प्रतिवक्त्रं त्रिलोचनम्।।
वक्रदण्डं कालकण्ठं व्यालयज्ञोपवीतिनम्।

सहस्रद्वयबाहूनां नागकङ्कणधारिणम्।।
कर्णपत्रसमायुक्तं नागकुण्डलभूषणम्।
ब्रह्मविष्णुकपालास्थि वराहं कूर्मदन्तकम्।।
सर्पवृश्चिकसंयुक्तं मालाभरणभूषितम्।
फालं खेटचक्रशूलं कुलिशं तोमरं तथा।।
सर्वायुधधरोपेतं उग्रकोपज्वलान्वितम्।
किङ्किणीवलयसंयुक्तं पादनूपुरमण्डितम्।।
अङ्गाङ्गैः रोमकूटानां उत्सवस्य भूतकम्।
दुष्टादि दुराचाराणां हतानां निग्रहकारणम्।।
शिष्टानां परिपालानां लोकानुग्रहकारणम्।
दक्षयज्ञध्वंसकरं वेदाचारस्थितं भवेत्।।

710.वागीशमूर्ति ध्यानम्

बद्धाञ्जलिकराम्बोजं भूतिरुद्राक्षधारिणम्।
वृद्धाकृतिं प्रशान्तश्च त्रणचेत्रिकरं शुभम्।।
शिवमन्त्रसंशुद्धिकरं उपर्याप्तवाससम्।
वागीशं द्राविडाचार्यं मानसे भावये सदा।।

711.सम्बन्ध ध्यानम्

पुरचूडो मनोगज्ञांगं बालं हारादिभूषितम्।
दिव्याम्बरधरं स्वर्णतालवाद्यकरं शुभम्।।
ईषदुक्तितदक्षोङ्घ्रिं क्वणत्नूपुरमण्डितम्।
वन्देऽहं द्राविडाचार्यं ज्ञानसम्बन्धमन्वहम्।।

712.सुन्दर ध्यानम्

किरीटमकुटोपेतं कर्णभूषादिभूषितम्।
पञ्चकच्छ धृतयुक् क्षौमं उत्तरीयधरं शुभम्।।
दक्षिणे पुष्पकुच्छञ्च करे वामे च वेत्रकम्।
दान्तं द्रविडाचार्धं सुन्दरं नौमि शाम्भवम्।।

713.मणिवाचकः

दक्षिणे जपमालाञ्च करे वामे च ताळकम्।
भद्रं दान्तं स्थविरं भूतिरुद्राक्षधारिणम्।
स्वच्छश्वेताम्बरधरं शान्तं शिवानन्दरसप्रदम्।
माणिक्यवाचकं वन्दे द्राविडाचार्यमन्वहम्।।

714.अश्वत्थवृक्षध्यानम्

ध्यायामि देवदेवेशं अश्वत्थाकारमच्युतम्।
शङ्खचक्रगदापद्मशार्ङ्ग श्रियःप्रियम्।
आवाहयामि देवेशं आदिमध्यान्तवर्जितम्।
अच्युतं सच्चिदानन्दं अश्वत्थं तरुरूपिणम्।

715.निम्बकन्यावृक्षध्यानम्

वृक्षस्वरूपिणीं शक्तिं विषरोगनिवारिणीम्।
वृक्षराजप्रियां देवीं निम्बकन्यां स्मराम्यहम्।।

716.विश्वामित्रः

जटामकुटशोभाढ्यं भस्मरुद्राक्षधारिणम्।
दारुवस्त्रधरं वन्दे विश्वामित्रमहं भजे।।

717.अगस्त्यः

शिवध्यानरतं शान्तं जटामकुटमण्डितम्।
रुद्राक्षमालासश्चिन्नं कमण्डलुधरं शुभम्।।
वामनं लोपामुद्रेशं अगस्त्यं भावयाम्यहम्।।

718.लोपामुद्रा

एकवक्त्रां द्विनेत्राञ्च जटामकुटशोभिताम्।
पद्माक्षमालाभूषाढ्यां मन्दस्मितमुखाम्बुजाम्।
देविचिन्तनमात्रेण परचिन्तनवर्जिताम्।
अगस्त्यप्रियपत्नीञ्च लोपामुद्रामहं भजे।।

719.गुरुगणपति ध्यानम्

चतुर्भुजं त्रिणेत्रञ्च जटामकुटशोभितम्।
पूर्वहस्तद्वये वापि दक्षिणे मुद्रिकान्वितम्।।
लम्बहस्ते तु वामे तु ऊर्ध्वे रुद्राक्षपुस्तकम्।
दक्षिणं लम्बितं पादं वामपादन्तु शायिनम्।।
व्याघ्रचर्माम्बरं देवं सर्पाभरणभूषितम्।
सर्वालङ्कारसंयुक्तं गणेशगुरुं भावये।।

720.करुप्पर् ध्यानम्

रक्ताक्षं कृष्णवस्त्रञ्च द्विभुजं मोहनाकृतिम्।
खड्गं दण्डं च बिभ्राणं सर्वालङ्कारशोभितम्।।
पार्श्वे कुक्कुटसंयुक्तं महाविक्रमशालिनम्।
करुप्पर् इति विख्यातं स्वामिनं भावयेत्सदा।।

721.कतिर्कामिस्वामि ध्यानम् (கதிர்காம முருகா்)

चिन्तयामि चिताकाशे काषायवस्त्रधारिणम्।
गणेशकावेर्याः तीरे लिङ्गरूपञ्च धारिणम्।।
सकलशास्त्रसम्पन्नं सर्वाभीष्टफलप्रदम्।
कतिर्कामिस्वामिनं वन्दे भक्तानुग्रहकारणम्।।

722.मुनीश्वरः

रक्तवर्णं त्रिणेत्रं च जटामकुटमण्डितम्।
भस्मोद्धूलितसर्वाङ्गं नागाभरणभूषितम्।।
त्रिशूलं दक्षहस्ते तु ऊरुहस्तन्तु वामके।
लम्बितं दक्षपादञ्च शयनं वामपादकम्।।
कर्णभूषणसंयुक्तं मुनीश्वरमुपास्महे।।

723.पट्टीश्वर दुर्गादेवी ध्यानम्

अभयं शङ्खं चक्रञ्च शुकञ्च ऊरुहस्तकम्।
खड्गं खेटञ्च बाणञ्च कार्मुखं सिंहवाहनम्।।
त्रिणेत्रञ्च जटामौलिं कर्णयोः सर्पकुण्डलम्।
महिषासुरसंहारीं देवीं दुर्गां प्रपूजयेत्।।

724.स्वर्णाकर्षणगणपति ध्यानम्

स्वर्णात्रौ स्वर्णगेहे मुकुटे मण्टपे रत्नपीठे
पूर्णानन्दं निषण्णं करिवरवदनं स्वर्णवर्णं त्रिणेत्रम्।
हस्ते पाशाङ्कुशेष्टान् अभयधनघटौ बिभ्रतं चन्द्रमौळिं
भक्तक्षिप्रप्रसादं गणपतिमनिशं नौमि सर्वार्थसिद्ध्यै।।

725.स्वर्णाकर्षणभैरव ध्यानम्

स्वर्णकालभैरवं त्रिशूलयुक्तपाणिनम्
वेदरूपसारमेवसंयुतं महेश्वरम्।
समाश्रितेषु सर्वदा सशक्तिउप संयुतम्
महीन्द्रिवंश पूर्वपुण्यरूपिणं समाश्रये।।

726.अष्टभुज सौभाग्यदुर्गा ध्यानम्

एकवक्त्रां त्रिणेत्राश्च किरीटमकुटान्विताम्।
साष्टहस्तसमायुक्तां अभयं चोरुहस्तकाम्।।
खड्गखेटधनुर्बाणशङ्खचक्रधरान्विताम्।
महिषोपरिस्थितां दुर्गां दुःखशोकविनाशिनीम्।।

727.अष्टभुज सौभाग्यदुर्गा ध्यानम्

सर्वालङ्कारयुक्तां सरसपदयुतां साष्टहस्तां त्रिणेत्रां
शङ्खं बाणं च खड्गं चाभयं सव्यहस्ते।
ऊरौ वामभुजां च चक्रकृपाणखेटदधतीं सौवर्णभूषोज्वलाम्
क्षौमां बद्धनितम्ब बिम्बलसितां सौभाग्यदुर्गां भजे।।

728.अरुणगिरि ध्यानम्

अरुणाचलनिवासन्तु बिभ्रश्मश्रु शिरोर्ध्वकम्।
गुहानुग्रहपरं देवं गुहध्यानस्वरूपकम्।।
यशोमालार्पितं स्तोत्रं गुहपादे समर्चितम्।
गुहभक्तप्रियं श्रेष्ठं दिव्यरूपं नमाम्यहम्।।

729.कृपावाग्देव ध्यान् (சேக்கிழார்)

द्विपादश्च द्विहस्तश्च एकवक्त्रं द्विनेत्रकम्।
वस्त्रचोत्तरीयकौपीनं भस्मरुद्राक्षधारिणम्।।
भक्तानां चरितं चैव द्राविडेन प्रकल्पितम्।
पुस्तकं वामहस्ते तु चिन्मुद्रां भावयेत्तु विचक्षणः।।

730.अष्टाष्टविग्रह नामानि

लिङ्गलिङ्गोद्भवश्चैव मुखलिङ्गं सदाशिवम्।
महासदाशिवं च उमामहेश्वरमतःपरम्।।
सुखासनं उमेशश्च सोमास्कन्दं तथैव च।
चन्द्रशेखरमूर्तिश्च वृषारूढं वृषान्तकम्।।
भुजङ्गलिलितं चैव भुजङ्गत्रासमेव च।
सन्ध्यानृत्तं सदानृत्तं ताण्डवीं जाह्नवीधरम्।
तथा गङ्गासनं चैव त्रिपुरान्तकमेव च।
कल्याणसुन्दरं चैव अर्धनारीश्वरं तथा।
गजयुद्धं ज्वरापघ्नं शार्दूलहरविग्रहम्।
तथा पाशुपतं चैव कङ्काळं केशवार्थकम्।
भिक्षाटनं च सिंहघ्नं चण्डेश्वरप्रसादकम्।
दक्षिणामूर्ति यत्गेयं योगवीणाधरं तथा।
कालान्तकश्च कामारी लकुलेशश्च भैरवम्।
आपदोद्धारणं चैव वटुकं क्षेत्रपालकम्।
वीरभद्रमघोरास्त्रं दक्षयज्ञहरं तथा।
किरातं गुरुमूर्तिश्च अश्वारूढं गजान्तिकम्।

जलन्धरवधश्चैव एकपादं त्रिमूर्तिकम्।
त्रिमूर्तिमेकपादञ्च तथा गौरीं वरप्रदम्।
चक्रदानस्वरूपञ्च गौरीनीलसमप्रभम्।
वृषापहरणं चैव गरुडं दाहमेव च।
तथा ब्रह्मशिरच्छेदं कूर्महंसारमेव च।
मत्स्याहारि वराहिरि प्रार्थनामूर्तिमेव च।
रक्तभिक्षाप्रदानञ्च शिष्यभावं तथैव च।
षडाननं तथा चैवाऽष्टाष्टविग्रहं तथा।।

731.सुब्रह्मण्य ध्यानम्

तिष्ठन्तं कमले शमीकृतद्वन्द्वं मयूराग्रयोः
वज्राभीति दक्षिणे धृतिकरं शक्तिं वरं तारकम्।
कर्णौ ताटङ्कयुग्मं करण्डमकुटं दक्षे तु वल्यम्बिकां
वामाङ्गेन तु देवसेनसहितं वन्दे कुमारं गुहम्।।

732.शूरसंहारमूर्ति ध्यानम्

रसमुखकरभानुं रक्तवर्णं किरीटं
धनुवरकुलिशखेटं पद्मपाशं च वामे।
शरमभयशक्तिं ह्यङ्कुशं चक्रहस्तं
सुरपतिविधिवन्ध्यं शूरसंहारमूर्तिम्।।

733.अभिमुक्तेश्वर ध्यानम्

पञ्चाननं दशभुजं प्रतिवक्त्रं त्रिलोचनम्।
दिव्यगन्धानुलिप्ताङ्गं दिव्यमालाविभूषितम्।।

नागोपवीतिनं शान्तं जटाखण्डेन्दुमण्डितम्।
अभीष्टफलसिद्ध्यर्थं अभिमुक्तेश्वरं भजे।।

734.नागराज ध्यानम्

चतुर्भुजं त्रिणेत्रञ्च जटामकुटमण्डितम्।
त्रिशूलं टङ्कपद्मञ्च वरदं शुक्लवर्णकम्।
वामपादन्तु शयनं दक्षिणे लम्बितं पदम्।
व्यालासनोपरिस्थं च पृष्ठपार्श्वोत्थि तोरणम्।
ज्वलत पञ्चफणोपेतं मकुटोपरिमूर्ध्नि च।।

735.भारती सरस्वती ध्यानम्

श्वेताभां दिव्यवस्त्राढ्यां वीणावादनलोलुपाम्।
अक्षमालां पुस्तकञ्च बिभ्रतीं भारतीं भजे।।

736.स्वामि ध्यानम्

धवळ वृषभसंस्थं सूर्यचन्द्राग्निनेत्रं
भुजगवलयहारं भस्मदिग्धाङ्गमीशम्।
हरिणपरशुपाणिं चन्द्रगङ्गाकपर्दीं
अभयवरदहस्तं सन्ततं नौमि शम्भुम्।।

737.तिरस्करिणी ध्यानम्

नीलं तुरङ्गमतिरुह्यविराजमानं
नीलांशुकाभरणमाल्यविलोपनाढ्या।
निद्रापुमेण भुवनानि तिरोदयानां
खड्गायुधा भगवती परिपातु भक्तान्।।

738.स्वामि ध्यानम्

शम्भो शङ्करशान्तशाश्वतविभो स्थाणो भवोमापते।
भूतेश त्रिपुरान्तक त्रिनयन श्रीकण्ठ कालान्तकार।
शर्वोग्राभय भर्गभीमजगतां नाथाक्षया श्रीनिधे।
रुद्रेशान महेश्वर महादेवेश तुभ्यं नमः।।

739.सुदर्शन ध्यानम्

पुरुषाय पुण्डरीकाक्षं चक्रस्य प्रियमायुधम्।
ज्वलत्पावकसङ्काशं सर्वकार्यफलप्रदम्।
एवं ध्यात्वा महाविष्णुं चक्रराजमहं भजे।।

740.सुदर्शन ध्यानम्

शङ्खं चक्रं च चापं परशुमसिमिषुं शूलपाशाङ्कुशाग्नीन्।
बिभ्राणं वज्रखेटौ हसमुसलगदा कुन्दमत्यग्रदंष्ट्रम्।
ज्वालाकेशं त्रिणेत्रं ज्वलदनलनिभं हारकेयूरवक्त्रं
वन्दे षट्कोणचक्रं सकलरिपुजनप्राणसंहारचक्रम्।।

741.धन्वन्तरि ध्यानम्

शङ्खं चक्रं जलूकां दधतममृतघटं चापि दोर्भिः चतुर्भिः
सूक्ष्मस्वच्छादि हृद्यां शुकपरिविलसत मौळिमम्बोजनेत्रम्।
कालाम्भोदो ज्वलाङ्गं कटितटविलसत चारुपीताम्बराढ्यं
वन्दे धन्वन्तरिं तं निखिलगदवनप्रौढदावाग्निलीलम्।।

742.गो ध्यानम्

शृङ्गे श्रोत्रे च युक्तां युगपदसहितां शुक्लवर्णां सुशोभाम्
लाङ्गूलां रम्यगात्रां सुरवरविनुतां नेत्रयुग्मां सुदीर्घाम्।
स्तन्यैर्रक्षणसर्वजन्तुविभवां स्वानन्दतेजोमयीम्
सर्वैस्संस्तुतपूज्यमाननिलयां ध्यायामि गोमातृकाम्।।

743.अश्व ध्यानम्

श्वेतवर्णं चतुष्पादं धृष्टदेहं सुपुच्छकम्।
पृष्ठास्तरणसम्बन्धं खलीनमुखशोभितम्।।
एवं ध्यायेत् वायुवेगं अश्वराजमहं भजे।।

744.सुमङ्गली ध्यानम्

वक्राब्जे तिलकोज्वलां गुणवतीं सौभाग्यसीमन्तिनीम्
नासाभूषणशोभिनीं स्मितमुखीं कर्णे तु ताटङ्किणीम्।
क्षौमालङ्कृत दिव्यकञ्चुकवतीं माङ्गळ्यसूत्रान्विताम्
कण्ठे भूषणहारनूपुरवतीं ध्यायामि सौमङ्गळीम्।।

745.सिंह ध्यानम्

पीतवर्णं चतुष्पादं लम्बजिह्वा महाबलम्।
दंष्ट्राकराळमत्युग्रं मृगराजं सगर्जनम्।।
क्रूरदृष्टिं महावीरं सिंहरूपं विभावयेत्।।

746.गजराज ध्यानम्

गजराजं नमस्तुभ्यं दन्तीन् गम्भीरवीक्षणम्।
पूजयामि मुदाहं त्वां प्रतिपूर्णमनोभव।।
धीरत्वं विघ्नहन्त्रत्वमुदारत्वं प्रदापय।।

747.गजराज ध्यानम्

शुण्डामण्डितदीर्घदन्तयुगळं श्रोत्रे तु शूर्पाकृतिम्।
ह्रस्वे नेत्रे च युग्मं करिवरतनुजं स्तम्भैवपादैर्युगम्।।
कृष्णाकारसुशोभमानरुचिरं पुच्छेपि रोमावळिम्।
वन्दे विघ्नहरप्रसादफलदं प्रत्यक्षविघ्नेश्वरम्।।

748.ऐरावतगज ध्यानम्

ऐरावतगजं वन्दे चतुर्दन्तं महाबलम्।
धिरेक्षणं शुभ्रगात्रं पूर्वाशा संस्थितं भजे।।

749.पुण्डरीकगज ध्यानम्

पुण्डरीकगजं शक्तं पुण्डरीकनिभं भजे।
आग्नेय्यां दिशि तिष्ठन्तं घण्टामण्डितशेखरम्।।

750.वामनगज ध्यानम्

वन्दे करिं वामनाख्यं कृष्णाञ्जनसमप्रभम्।
दक्षिणे शाश्वतः पार्श्वे संस्थितं सुरवीक्षणम्।।

751.कुमुदगज ध्यानम्

कुमुदं शक्तसंकाशं द्विरदं मणिमण्डितम्।
प्रेतवाहादिनाथस्य काष्ठासंस्थं नमाम्यहम्।।

752.अञ्जनगज ध्यानम्

अञ्जनाख्यं दन्तिपर्यं वारुणाशागतं भजे।
अच्छाच्छधवळप्रख्यं रत्नमालाविराजितम्।।

753.पुष्पदन्तगज ध्यानम्

पाटलीपुष्पसंकाशं पुष्पदन्तं गजोत्तमम्।
पञ्चलच्छारुगात्रं च वाय्वाशावल्लभं भजे।।

754.सार्वभौमगज ध्यानम्

सार्वभौमं महादन्तिं वर्थं स्वर्णनिगं विभुः।
उत्तराशागुरुं वन्दे धनधेनाभिलम्बितम्।।

755.सुप्रतीकगज ध्यानम्

ईशानदिक्स्थितं शान्तं सुप्रतीकं मनोहरम्।
धवळाचलसंकाशं चन्द्रचूडमसिप्रदम्।।

756.विघ्नेश्वरविमानध्यानम्

वन्दे विघ्नविनायकस्य विमानकुम्भनिलयं सर्वार्थसिद्धिप्रदम्।
हस्तैश्शोभितदन्तमोदकघटं पाशाङ्कुशं बिभ्रतम्।।
नानादेवविराजमानवपुषं वर्णास्तु चित्राढ्यकम्।
सर्वैस्सेवितदृश्यमानविभवं भक्त्यैकलभ्यं परम्।।

757.शरभ ध्यानम्

चन्द्रार्काग्निस्तृदृष्टिः कुलिशवरनखः चञ्चला ह्युग्रजिह्वः।
काळी दुर्गा च पक्षौ हृदयजठरगौ भैरवो बाढवाग्निः।
ऊरूस्थौ व्याधिमृत्यू पदहतनृहरिश्चण्ड वातातिवेगः।
संहर्ता सर्वशत्रून् विजयति शरभः साळुवः पक्षिराजः।।

758.सुब्रह्मण्य ध्यानम्

ध्यायेत् षण्मुखमिन्दुकोटिसदृशं रत्नप्रभाशोभितम्।
बालार्कद्युति षट्किरीटविलसत केयूरहारान्वितम्।।
कर्णालम्बित कुण्डलप्रविलसद्गण्डस्थलैश्शोभितम्
काञ्चीकङ्कणकिङ्किणीरवयुतं शृङ्गारसारोदयम्।।

759.श्यामलादेवी ध्यानम्

सर्वशृङ्गारशोभाढ्या तुङ्गपीनपयोधराम्।
गङ्गाधरप्रियां देवीं मातङ्गीं नौमि सन्ततम्।।

760.विषापहरणमूर्ति ध्यानम् (பள்ளிகொண்டேஸ்வரர்)

एकवक्त्रं त्रिणेत्रं च किरीटमकुटान्वितम्।
अभयं च मृगं दक्षे ऊरुहस्तन्तु वामके।।
सर्वालङ्कारसंयुक्तं वामोर्ध्व टङ्कहस्तकम्।
विषाश्चादनविभ्रान्त्या गौरीजानोपशायिनम्।।
सर्वदेवैस्तुतं नित्यं नीलकण्ठं विभावयेत्।।

761.कल्पकविनायक ध्यानम् (பிள்ளையார்பட்டி)

गणेशं पुरुषाकारं गडकर्णं गजाननम्।
महोदरं बृहत्कायं एकदन्तं त्रिलोचनम्।।
सौम्यनेत्रन्तु लम्बोष्ठं नागयज्ञोपवीतिनम्।
जटामकुटसंयुक्तं सर्वाभरणभूषितम्।।
करद्वयं द्विपादं च ह्युपविष्टन्तु पङ्कजे।

कटिविन्यस्तहस्तश्च लिङ्गं वै दक्षहस्तके।।
एवं गणेशरूपन्तु ध्यात्वा मन्त्रेण पूजयेत्।।

762.मनोन्मनी ध्यानम्

रक्तवर्णोज्वलां देवीं शुक्लवस्त्रेणभूषिताम्।
सर्वाभरणसंपूर्णां पीनोरुजघनस्थलाम्।।
त्रिणेत्रां गन्धपुष्पाढ्यां केशाळकविभूषिताम्।
पद्मोत्पलधरां देवीं वरदाभयपाणिनीम्।।
देवस्य वामभागे तु दिव्यरूपां मनोन्मनीम्।
पद्माक्षमालयायुक्तां अभयामूरुहस्तकाम्।।
गण्ड्यक्षमालयायुक्तां वरदाभयपाणिनीम्।।

763.सप्तकन्यकानां नामानि

भट्टारकी तु प्रथमा द्वितीया देवकन्यका।
तृतीया पद्मकन्या तु चतुर्थी सिन्धुकन्यका।।
अगजा पञ्चमी चैव वनकन्या तु षष्ठका।
सप्तमी सुमतीकन्या इत्येताः सप्तकन्यकाः।।

764.भट्टारकी कन्यका ध्यानम्

आदिशक्त्यन्तु जननी चित्रभावेन पङ्कजा।
लम्बितं वामहस्ते तु भूषणां पुष्यरागकाम्।।
इह कुम्भस्तनीं चैव चन्द्रबिम्बमुखान्विताम्।
कन्यां भट्टारकीं ध्यायेत् आवाह्येवं प्रपूजयेत्।।

765.देवकन्यका ध्यानम्

स्वर्गलोकोद्भवां कन्यां तटिद्वर्णसिताननाम्।
कल्पप्रसूनसव्यन्तु लम्बितामपसव्यके।।
स्वर्णालङ्कृतभूषाढ्यां सितवर्णेन वेष्टिताम्।
निम्नन्तु देवकन्यानां ध्यायेदावाहयेद्बुधः।।

766.पद्मकन्यका ध्यानम्

शेषलोकोद्भवां कन्यां केतकी दक्षसंयुताम्।
लम्बितां वामहस्ते तु श्वेताभामेकवक्त्रकाम्।।
माणिक्याभरणं भूष्यां रक्तवस्त्रेणशोभिताम्।
बद्धवेणीं पद्मकन्यां ध्यायेदावाहयेद्बुधः।।

767.सिन्धुकन्यका ध्यानम्

रत्नाकरोद्भवा नीला दक्षाब्जा वामलम्बिनी।
नीलाम्बरी बद्धकेशी जलमौक्तिकभूषिता।।
करुणाकरलोलाक्षी कस्तूरितिलकोज्वला।
एकानना सिन्धुकन्या ध्यायेदावाह्य पूजयेत्।।

768.अगजाकन्यका ध्यानम्

एकवक्त्रां शैलपुत्रीं प्रवालाबा शिवार्चनीम्।
काषायवस्त्रमेवन्तु भूषितां वेणुमौक्तिकाम्।।
बद्धवेणीं तामगजां ध्यायेदावाहयेद्बुधः।।

769.वनकन्यका ध्यानम्

श्यामाभामेकवक्त्रन्तु श्यामवस्त्रोत्तरीयकाम्।
मल्लिका दक्षहस्ता तु वामहस्ते तु लम्बिनीम्।।
दन्ताभरणभूष्यां तु पुत्रिकां वनमातराम्।
वनकन्यां बद्धवेणीं ध्यायेदावाह्य पूजयेत्।।

770.सुमतीकन्यका ध्यानम्

उद्भवा धरणी तन्वी स्वर्णाभरणमेखला।
वैढूर्याभरणं भूष्या सितवर्णेनवेष्टिता।।
नाम्ना वसुमतीकन्या ध्यायेदावाह्य पूजयेत्।।

771.घटेश्वरी ध्यानम् (குடவாசி)

ज्वालाकेशकिरीटिनीं भगवतीं शोणाङ्गरागाङ्कितां
खड्गंदण्डकपालपाशसहितां वीरासने संस्थिताम्।
नानाभूषणभूषितां स्मितमुखीं नानार्थसिद्धिप्रदाम्
वन्दे श्रीघटेश्वरीं गुणमयीं सम्पूर्णबिम्बोज्वलाम्।।

772.गरुड ध्यानम्

पादे विष्णुविलोचनं कटितटे श्रीनारसिंहाजिनं
हस्ते शूलकपालडक्क डमरुं कण्ठे तु हालाहलम्।
शूलाग्रेशवकेशवं हरिं शिरोमालां ततन्मौलिना
सर्वं विष्णुमयं सदाशिववपुः वक्त्रं पुराणादि तत्।।

773.यमूना ध्यानम्

द्विभुजाश्च द्विनेत्राश्च श्यामवर्णसमन्विताम्।
कूर्मासन समारूढां सर्वाभरणभूषिताम्।।
पूर्णकुम्भन्तु वामे तु उत्फलं सव्यहस्तके।
यमुनाया स्वरीपन्तु सर्वावयवसंयुताम्।।

774.पाकशः (इन्द्रः)

द्विभुजश्च द्विनेत्रश्च श्यामवर्णसमायुतम्।
सव्यहस्ते वह्निवज्रं वामहस्तेऽभयं तथा।।
रक्ताम्बरसमायुक्तं सर्वाभरणभूषितम्।
हस्तिवाहनमोवोक्तं इन्द्रस्याकृतिरुच्यते।।

775.जातवेदः अग्निः

द्विभुजश्च द्विनेत्रश्च रक्तवर्णसमायुतम्।
द्विपादश्च समायुक्तं ऊर्ध्वकेशाय दीप्तिकम्।
पीतवस्त्रसमायुक्तं सर्वपुष्पैरलङ्कृतम्।
शुक्लयज्ञोपवीतश्च शुक्लवस्त्रोत्तरीयकम्।।
स्रुक्स्रुवं सव्यहस्ते तु वामहस्ते तु धारिणम्।
अजवाहनसमायुक्तं वह्नेराकृतिरुच्यते।।

776.कृतान्तः यमः

कालाञ्जननिभाकारं विद्युत्सदृश दंष्ट्रकम्।
द्विभुजो रक्तकेशश्च किञ्चित भ्रूसविभ्रमः।।
दण्डायुधसमायुक्तं महिषस्य तु वाहनम्।

द्विनेत्रं च द्विपादं च सर्वाभरणभूषितम्।।
यमं स्यात् कृतिराख्यातं भीमरूपं प्रपूजयेत्।।

777.यातुधानः निर्ऋतिः

द्विभुजश्च द्विनेत्रश्च कृष्णवर्णसमायुतम्।
हेमवस्त्रपरीदानं खड्गखेटकसंयुतम्।।
नरवाहनसंयुक्तं सर्वाभरणभूषितम्।
सर्वाभरणसंयुक्तं राक्षसाकृतिरुच्यते।।

778.प्रचेतसः वरुणः

शङ्खं कुन्देन्दु धवळं द्विभुजश्च द्विनेत्रकम्।
सर्वाभरणसंयुक्तं कुण्डलाभ्यां विराजितम्।।
सव्ये पाशंच वामे तु मकरस्थं तु वाहनम्।
सर्वलक्षणसंयुक्तं वरुणस्याकृतिरुच्यते।।

779.मातरिश्वा वायुःङ

कृष्णवर्णं द्विनेत्रं च कुञ्चितभ्रूसविभ्रमम्।
द्विपादं शुक्लवस्त्रं च द्विहस्तन्तु तथैव च।।
सव्येङ्कुशवहन्वामे प्रलम्भकटकं वहन्।
मिश्रवर्णाम्भरैर्युक्तं मृगारूढौ सुयौवनम्।।
वायुरूपमिति ख्यातं वायुदेवमिहोच्यते।।

780.धनदः कुबेरः

द्विभुजं च द्विनेत्रश्च श्वेतवर्णसमायुतम्।
शुक्लवस्त्रपरीधानं सरत्नमकुटान्वितम्।।

गदायां सव्यहस्ते तु वहश्च वामहस्तके।
अश्ववाहनमेवोक्तं कुबेरस्याकृतिं शृणु।।

781.त्र्यम्बकः ईशानः

चतुर्भुजं त्रिणेत्रं च श्यामवर्णसुयौवनम्।
शुक्लयज्ञोपवीतं च वृषारूढं सुशान्तकम्।।
कपर्दीभस्म दिग्धाङ्गं तरुणेन्दु विभूषणम्।
शूलं चाभयहस्तं च मृगटङ्कं तथैव च।।
दक्षिणे दक्षिणे यार्धं व्याघ्रचर्माम्बरान्वितम्।
ऐशान्यां कृतिराख्यातं द्विभुजं चापि कारयेत्।।

782.त्रिपुरभैरवकाळी ध्यानम्

त्रिमुखीं स्वर्णवर्णाभां रसहस्तसमन्विताम्।
नागं डमरुकं चैव खड्गखेटसमन्विताम्।।
शूलं कपालहस्तां च वीरासन सुसंस्थिताम्।
महिषोर्ध्वे सुपादं च त्रिपुराद्यम्बिकां शिवाम्।।

783.वरुणः

नीलाभो रक्तवस्त्रो ध्वजधवळयुतो पाशधारी नदीशः
मत्स्यारूढः प्रसन्नो हितजनविनुतो वारुणो मेघजातः।
वंबीजं प्राप्यशुद्धो मणिमकुटयुतो दुर्धरो घोषशाली
कल्याणं सततं तं नः प्रदिशतु वरुणः काङ्क्षितार्थप्रदायी।।

784.सोम ध्यानम्

सोमं सिंहासनस्थं कुरवक धवळं सौम्यवक्त्रं द्विबाहुं
तेजो लाजाभिलीलं करधृतकुमुदं कृत्तिकारोहिणीभ्याम्।
सव्ये वामे च पार्श्वे कलितमयिवतीं तारकाणां च शान्तं
कान्तं सर्वौषधीनां धृतसितवदनं सुप्रसन्नं नमामि।।

785.कृत्तिकादेवी ध्यानम्

हेमवर्णां द्विनेत्रां च पीताम्बरविभूषिताम्
उत्फलं वामहस्ते च दक्षहस्ते प्रलम्बिताम्।
करण्डमकुटोपेतां ताटङ्काद्युपशोभिताम्
एवं ध्यात्वा विशेषेण कृत्तिकां च विभावयेत्।।

786.रोहिणीदेवि ध्यानम्

रोहिणीं पीतवर्णाभं द्विनेत्रां द्विभुजान्वितां
पङ्कजं दक्षिणे हस्ते वामोरौ न्यस्तकास्तकाम्।
करण्डमकुटोपेतां दुकूलवसनान्वितां
सर्वालङ्कारसंयुक्तां सर्वाभरणभूषिताम्।।

787.पूर्णा ध्यानम्

पूर्णां वै कनकाभासां द्विनेत्रां द्विभुजान्विताम्।
दक्षिणे लम्बितं पादं वामपादं सुखासनम्।।
पुष्पं वामकरं चैव कटकं दक्षिणे करे।
श्यामवस्त्रधरां चैव कर्णे मकरकुण्डलाम्।।

788.पुष्कळा ध्यानम्

श्यामदेहां द्विनेत्रां च द्विभुजां च द्विपादकाम्।
वरदं वामपाणौ च पुष्पं च दक्षिणे करे।।
लम्बितं वामपादं तु दक्षिणे च सुखासनम्।
सिंहकुण्डलकर्णां च कनकाम्बरधारिणीम्।।

789.शिवसूर्य ध्यानम्

धवळाम्बोरुहारूढं डाडिमीकुसुमप्रभम्।
स्फुरद्रक्तमहातेजो वृत्तमण्डलमध्यकम्।
अंसासक्तदस्फुटश्वेत सनालाब्जकरद्वयम्।
एकास्यं चिन्तयेद्भानुं द्विनेत्रं रक्तवाससम्।।

790.शिवसूर्यपरितः ग्रहाणि

सोमं कुमुदकुन्दाभं बुधं चामीकरप्रभम्।
गुरुं गोरोचनाभासं शुक्लं गोक्षीरसन्निभम्।।
रक्तमङ्गारकं ध्यायेत् राजावर्तनिभं शनिम्।
कृष्णं कृताञ्जलिं राहुं केतुं धूम्राहिसन्निभम्।।
कामरूपधरान् सर्वान् सर्वाभरणभूषितान्।
वामोरुन्यस्तहस्तांश्च दक्षहस्ताऽभयप्रदान्।।
सितपद्मकरं सोमं राहुं केतुं कृताञ्जलिम्।
अर्धकायोर्ध्वकोशौ च रक्तसृग्रक्तलोचनौ।।
शनिं दंष्ट्राकराळं तु राहुं च विकृताननम्।।

791.लिङ्गोद्भव ध्यानम्

लिङ्गमध्ये महादेवं जटाचन्द्रार्धधारिणम्।
चतुर्भुजं त्रिणेत्रं च मृगटङ्क वराभयम्।।
ऊर्ध्वे तु हंसरूपं स्यादम्धोरूपं वराहकम्।
एवं सदाशिवं ध्यायेत् लिङ्गोद्भवं महेश्वरम्।।

792.सप्तगुरुसमष्टि ध्यानम्

सदाशिवस्तु श्वेताभः अनन्तश्श्याळाकृतिः।
श्रीकण्ठः शुक्लवर्णश्च अम्बिका नीलवर्णका।।
गुहः पीतनिभो विष्णुः कृष्णो रक्तस्ततोविधिः।
पद्मासनस्थितास्सर्वे भस्मरुद्राक्षधारिणः।।
कृताञ्जलिपुटा रम्याः करण्डमकुटान्विताः।।

CENTRE FOR SHAIVA STUDIES
Pondicherry

793.ब्रह्मचारी पूजाकाले

मौञ्जी यज्ञोपवीतं च शिखां रुद्राक्षधारिणम्।
स्वशाखाश्रितं मुख्यं सदाध्ययनमाचरेत्।।
नित्याह्निकंक्रमं कृत्य ब्रह्मतेज सुलक्षणम्।
ब्रह्मचारी स्वरूपं तु प्रत्यक्षं च गणाधिपम् कुमारकम् वटुनायकम्।।

794. सप्तमातर नामानि

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।
वाराही चैव माहेन्द्री चामुण्डा सप्तमातरः।।

795.ब्राह्मीमातृ ध्यानम्

चतुर्भुजां चतुर्वक्त्रां पीतमाल्याम्बरोज्वलाम्।
वरदाभयहस्तां च साक्षमालां सगण्डिकाम्।।
जटामकुटसंयुक्तां सिंहवाहनसुस्थिताम्।
सर्वाभरणसंयुक्तां ब्राह्मीं ध्यात्वा प्रपूजयेत्।।

796.माहेश्वरीमातृ ध्यानम्

एकवक्त्रां त्रिणेत्रां च महादेवीं चतुर्भुजाम्।
जटामकुटसंयुक्तां शुक्लवर्णां सुशोभिताम्।।
वरदाभयहस्तां तां मृगटङ्कश्च धारिणीम्।
वृषवाहसमारूढां वन्दे माहेश्वरीं शुभाम्।।

797.कौमारीमातृ ध्यानम्

एकवक्त्रां द्विनेत्राश्च चतुर्भुजसमन्विताम्।
जटामकुटसंयुक्तां नीलवर्णां सुयौवनाम्।।
वरदाभयहस्तां तां वज्रं शक्तिं च धारिणीम्।
सर्वलक्षणसम्पन्नां कौमारीं तां विभावयेत्।।

798.वैष्णवीमातृ ध्यानम्

एकवक्त्रां द्विनेत्रां च चतुर्भुजसमन्विताम्।
वराभयकरां श्यामां शङ्खं चक्रं च धारिणीम्।।
नवयौवनसम्पन्नां श्रीमद्गरुडवाहनाम्।
सर्वलक्षणसम्पन्नां वैष्णवीं देविकां भजे।।

799.वाराहीमातृ ध्यानम्

एकवक्त्रां द्विनेत्रां च चतुर्भुजसमन्विताम्।
कृष्णाम्बरधरां देवीं वराहचक्रसंयुताम्॥
हलमुसलहस्तां तां वराभयकराम्बुजाम्।
सिंहवाहसमारूढां किरीटमकुटोज्वलाम्॥
सर्वालङ्कारसम्पन्नां वाराहीं पूजयेद्बुधः॥

800.माहेन्द्रीमातृ ध्यानम्

एकवक्त्रां द्विनेत्रां च चतुर्भुजसमन्विताम्।
सरत्नमकुटोपेतां हेमवर्णस्वरूपिणीम्॥
वराभयकराम्भोजां वज्रं शक्तिं च धारिणीम्।
माहेन्द्रीं मातरं वन्दे गजवाहनसंस्थिताम्॥

801.चामुण्डामातृ ध्यानम्

चतुर्भुजां त्रिणेत्रां च कालमेघसमप्रभाम्।
दंष्ट्राकराळवदनां व्याघ्रचर्माम्बरोज्वलाम्॥
सखड्गां शूलहस्तां च कपालाभयधारिणीम्।
किङ्किणीमालयायुक्तां करण्डमकुटान्विताम्॥
शिरोमालासमायुक्तां प्रेतवाहनसंस्थिताम्।
पीनस्तनीं यौवनां च चामुण्डां भावयेत्सदा॥

802.महारथः

दिग्स्थानेषु धर्माधर्मं च मध्ये नीलरुद्रविराजितम्।
रथप्रासाद चोर्ध्वेषु शिवं (देवं) स्थूलनिवासिनम्॥

कुमारं पूर्वदिग्भागे पश्चिमे विष्णुमेव च।
याम्ये दक्षिणामूर्तिरिवन्तु ब्रह्माणं चोत्तरेपि च ।।
सदाशिवं स्थूपिकायां भाराग्रे वेदरूपिणम्।
सारथिं ब्रह्मदेवान्तु दिगिशान् लोकपालकः।।
पार्श्वाग्रे जयं विजयं चैव मस्तके वरुणमेव च।
सर्वदेवान् स्वरूपंच रथदेवान् प्रपूजयेत्।।

803.गणेशः

क्षित्यादिकुटिलाप्रान्त मन्त्रसिंहासनस्थितम्।
सहस्रदळपद्मस्थं कर्णिकामध्यवासिनम्।।
रक्ताभं भस्मलिप्ताङ्गं त्रिणेत्रं मकुटान्वितम्।
पाशाङ्कुशधरं देवं नागयज्ञोपवीतिनम्।।
दन्तं च मोदकं चैव तुण्डहस्तेन धारिणम्।
लम्बोधरं बृहत्कायं ध्यात्वा मन्त्रेण पूजयेत्।।

804.वल्लभादेवी ध्यानम्

श्यामवर्णां द्विनेत्रां च करण्डमकुटान्विताम्।
उत्फलं दक्षिणे हस्ते वामे लम्बकरान्विताम्।।

805.सुब्रह्मण्यः

क्षित्यादिकुटिलाप्रान्तमन्त्रसिंहासनस्थितम्।
नागरत्नप्रभं हृद्यं द्वात्रिंशल्लक्षणान्वितम्।।
मयूराधिरूढमेकास्यम् अब्जार्काग्नित्रिलोचनम्।
वराभयं शक्तिवज्रं शक्तिशूलसमन्वितम्।।

वल्लीसेनासमायुक्तं दिव्याभरणभूषितम्।
सुब्रह्मण्यं सुरेशानं भावयेऽहं सदा विभुम्।।

806.मनोन्मनी ध्यानम्

क्षित्यादिकुटिलाप्रान्तमन्त्रसिंहासनस्थिताम्।
इन्द्रनीलमणिप्रख्यां द्वात्रिंशल्लक्षणान्विताम्।।
पद्मासनस्थितां शान्तां त्रिणेत्रां यौवनोज्वलाम्।
दृक्क्रियेच्छां विशाल़ाक्षीम् एकवक्त्रसरोरुहाम्।।
मनोन्मनीं चतुर्हस्तां वराभयकराम्बुजाम्।
गण्ड्यक्षमालां दधतीं जटामकुटमण्डिताम्।।
पीताम्बरां दिव्यगन्धपुष्पाभरणभूषिताम्।
ध्यात्वावाहयेद्देवीं निष्कलां सकळां शिवाम्।।

807.अनन्तनाग ध्यानम्

अनन्तं मिश्रवर्णाभं दशवक्त्रसमन्वितम्।
द्विभुजं अञ्जलीयुक्तं शूलं परशुसंयुतम्।।
पश्चिमाभिमुखं ध्यात्वा दक्षकञ्चावलोकिनम्।
शिरोधःपुरुषाकृत्य सर्वाभरणभूषितम्।।

808.वासुकीनाग ध्यानम्

वासुकी शङ्खवर्णाभं वक्त्रसप्तकसंयुतम्।
साञ्जलीं च द्विहस्तं तु द्विहस्तं पद्मसम्युतम्।।
उत्तराभिमुखं सौम्यं कार्कोटकसुवीक्षितम्।।

809.तक्षकनाग ध्यानम्

तक्षकश्चेन्द्रनीलाभं पञ्चवक्त्रसमन्वितम्।
चतुर्भुजसमायुक्तं द्विभुजं चाञ्जलीयुतम्।।
अन्यत्पाशाङ्कुशोपेतं प्रतिवक्त्रं त्रिलोचनम्।
पूर्वस्यां दिशिमाश्रित्य अनन्तं अवलोकिनम्।।

810.कार्कोटकनाग ध्यानम्

कार्कोटकं धूम्रवर्णं वक्त्राष्टकसमन्वितम्।
शिरोर्ध्वे साञ्जलीयुक्तं खड्गशूलसमायुतम्।।
दक्षिणाभिमुखं क्रूरं वक्त्रे वक्त्रे त्रिणेत्रकम्।
वासुकीं चेक्षितं सम्यक सर्वाभरणभूषितम्।।

811. शङ्खपालनाग ध्यानम्

श्वेतप्रभं शङ्खपालं पञ्चवक्त्रफणान्वितम्।
द्विभुजं अञ्जलीयुक्तं पाशोज्वलकरद्वयम्।।
वायव्याभिमुखं कृत्वा पद्मश्चाप्यवलोकितम्।।

812.गुळिकनाग ध्यानम्

गुळिकं श्यामळाकारं चतुर्वक्त्रसमायुतम्।
कृताञ्जलिपुटोपेतं हस्तद्वय धृतोत्पलम्।।
ईशानाभिमुखीभूय महापद्मावलोकिनम्।।

813.पद्मनाग ध्यानम्

पद्मञ्च रक्तवर्णाड्यं पञ्चवक्त्रं चतुर्भुजम्।
अञ्जलिम् अक्षमालाञ्च गुण्डिकां बिभ्रतीं करे।।
आग्नेयाभिमुखं कृत्वा शङ्खपालां च वीक्षितम्।।

814.महापद्मनाग ध्यानम्

काचपाभं महापद्मं सहस्रवक्त्रकैर्युतम्।
चतुर्भुजसमायुक्तं हृदयाञ्जलिसंयुतम्।।
कुठारटङ्कं बिभ्राणं नैर्ऋत्याभिमुखस्थितम्।
शिरोधः पुरुषाकृत्य गुळिकञ्चावलोकिनम्।।

815.नरमुखगणपति ध्यानम्

द्विभुजममलदेहं एकवक्त्रं द्विनेत्रं
बृहदुदरधरन्तं नागयज्ञोपवीतम्।
पशुपतिसुतमीशं श्रीगणेशं स्वशङ्ख्यं
नरमुखशिशुरूपं आदिराजं नमामि।।

816.शोकपाणै ध्यानम्

दीर्घमात्रं तालवक्षं दण्डाकारसुशोभितम्।
पीठेऽपि वृत्तमारभ्य ताळपत्रेण वेष्टितम्।।
स्तम्भोर्ध्वे मकुटं प्रोक्तं दर्भसूत्रेण बन्धनम्।
अन्धे दीपं च संस्थाप्य शिवं सम्पूजयेत्क्रमात्।।
दीपज्योतिपरं ब्रह्मा दीपज्योतिस्सदाशिवः।
दर्शनार्थञ्च जीवात्मा लोकानुग्रहहेतवे।।
बृहत्ज्योतिः प्रकाशाय महत्ज्योतिर्नमोऽस्तु ते।।

817.भूमिदेवी ध्यानम्

द्विभुजां च त्रिणेत्रां च करण्डमकुटान्विताम्।
रक्तामाल्याम्बरधरां श्यामाम्बुजलोचनाम्।।
सर्वाभरणसंयुक्तां दक्षहस्तोत्फलां श्रियम्
हेमयज्ञोपवीतां तां भूमिदेवीमाश्रये सदा।।

818.सनक ध्यानम्

एकवक्त्रं त्रिणेत्रं च द्विभुजां च जटाधरम्।
रुद्राक्षमालिकायुक्तं भस्मोद्धूलितविग्रहम्।।
सनकं वामनाकारं धृताक्षमणिमालिकम्।
शुद्धस्फटिकसंकाशं वन्देऽहं बालरूपिणम्।।

819.कपिलशक्ति ध्यानम्

मातृकाशक्तियुक्तां श्रीं सर्वावयवशोभनाम्।
मुखे तु चन्द्रदैवत्यं पृष्ठे गङ्गासरस्वत्यौ।।
पुच्छाग्रे सर्वतीर्थानि स्कन्धयोरग्निभास्करौ।
रोममूले ऋषीन्सर्वान् पादेषु धर्मदेवताम्।।
शङ्खं चक्रं चामरञ्च बिभ्रतीं कपिलां शुभाम्।
सर्वपापहरां वन्दे गोरूपां देवतां सदा।।

820.सनन्दन ध्यानम्

द्विभुजं चैकवक्त्रं च जटाकूर्चधरं मुनिम्।
ज्ञानमुद्राञ्चितकरं चोर्ध्वहस्तेन शोभितम्।।

किञ्चित्कुञ्चितवामाङ्घ्रिं प्रलम्बि दक्षिणाङ्घ्रिकम्।
धृतरुद्राक्षभस्म श्रीसनन्दनमुपास्महे।।

821.सनातन ध्यानम्

द्विनेत्रं द्विभुजं चैव वरदाभयसंयुतम्।
रुद्राक्षमालिकाभूषं भस्मोद्धूलितविग्रहम्।।
जटामण्डलसंयुक्तं लम्बकूर्चं सुखासनम्।
जपमालाधरं शान्तं सनातनमम्हं भजे।।

822.सनत्कुमार ध्यानम्

एकास्यं द्विभुजं शान्तं जटिलं वामनाकृतिम्।
दीर्घकूर्चं महान्तानिं रुद्राक्षमणिभूषणम्।।
भस्मोद्धूलितसर्वाङ्गं योगपट्टविराजितम्।
सनत्कुमारं तं वन्दे नानाभरणभूषितम्।।

823.उग्रकाळी ध्यानम्

एकवक्त्रां उग्रदंष्ट्रां शिखिज्वालशिखां शुभाम्।
श्यामाङ्गीं रक्तवस्त्रां तां द्वात्रिंशत्भुजशोभिनीम्।।
दक्षे वेत्रासि वेताळशूलखड्गशराङ्कुशाः।
कुठारक्षुरिकाखेट ढक्का भ्रमरशक्तयः।।
वामे कपालदहनघण्टा पाशेन डिण्डिमाः।
शङ्खाहि चापमुसल डिण्डि लाङ्गलगेन्दुका।।
सर्वालङ्कार संयुक्तां सर्वभरणभूषिताम्।
सुरासुरस्तोमवन्द्यां उग्रकाळीं नमाम्यऽहम्।।

824.निग्रहकाळी ध्यानम्

एकास्यामग्निज्वालोग्रमायताक्षीं भयङ्कराम्।
क्रूरदंष्ट्रां रक्तमाल्याम् अष्टादशभुजान्विताम्।।
भयावहां चित्रवस्त्रां शिरोमालाविभूषिताम्।
तुङ्गस्तनभरां नम्रां गर्जन्तीं समराङ्गणे।।
सव्ये घण्टेषु मुसळचक्रवज्रासि यःकरे।
कपालनाग क्षुरिका शङ्खखेटाङ्कुशाः परे।।
शरासनकरां भीमां धृतभेतालविग्रहाम्।
चामुण्डां उग्ररूपां तां भजे निग्रहकालिकाम्।।

825.अनुग्रहकाळी ध्यानम्

दंष्ट्राकराळवदनां त्रिणेत्रं च चतुर्भुजाम्।
ऊर्ध्वोन्न सुकेशां तां नीलवर्णां ज्वलच्छिखाम्।।
कपालपाश ढक्कोग्रशूल हेतिधरां शुभाम्।
वराभयकरां शान्तां भजेऽनुग्रहकाळिकाम्।।

826.भद्रकाळी ध्यानम्

एकवक्त्रां त्रिणयनां ऊर्ध्वकेशसमन्विताम्।
श्यामवर्णसमायुक्तां चतुर्दोर्दण्डमण्डिताम्।।
शूलं डमरुकञ्चैव कपालं पाशमेव च।
बिभ्रतीं फुल्लनयनां नानाभरणभूषिताम्।।
प्रसन्नवदनां देवीं दुकूलवसनोज्ज्वलाम्।
सिंहाधिरूढां भद्राप्त्यै भद्रकाळीमऽहं भजे।।

827.भद्रकाली ध्यानम्

श्यामां रक्ताम्बरां वह्निशिखां भीमां त्रिणेत्रकाम्।
अष्टाभिर्भुजैरुग्रां तां बलाढ्यां समदां शुभाम्।।
कपालशूलभेताळ खड्गढक्कायुधोज्वलाम्।
सुखासनस्थां चामुण्डां भद्रकालीं नमाम्यऽहम्।।

828.महाकाळी ध्यानम्

नीलोत्पलसमप्रभां षोडशाननसंयुताम्।
त्रिणेत्रां रक्तवस्त्रां च किरीटमकुटोज्वलाम्।।
अष्टादशभुजसंयुक्तां अग्निज्वाला शिखोज्वलाम्।
सिंहवाहन संरूढां उग्रदन्तां सगर्जनाम्।।
कुठारशूलभेदाळ ढक्का वेत्रगदायुधाम्।
चापबाणासिपरशू शक्त्यङ्कुशकरां शुभाम्।।
ओङ्काररूपिणीम् अम्बां महाकाळीं प्रूपजयेत्।।

829.असिताङ्गभैरव ध्यानम्

त्रिणेत्रं वरदं शान्तं मुण्डमालाविभूषितम्।
श्वेतवर्णं कृपामूर्तिं भैरवं कुण्डलोज्वलम्।।
गदाकपालसंयुक्तं कुमारं च दिगम्बरम्।
पानपात्रं च खड्गं च अक्षमालां कमण्डलून्।।
नागयज्ञोपवीतं च धारिणं सुविभूषितम्।
ब्रह्माणी शक्तिसहितं हंसारूढं सुरूपिणम्।।
सर्वाभीष्टप्रदं नित्यम् असिताङ्गं भजाम्यऽहम्।।

830.रुरुभैरव ध्यानम्

त्रिणेत्रं वरदं शान्तं कुमारं च दिगम्बरम्।
टङ्कं कृष्णमृगं पात्रं बिभ्राणं च कृपाणकम्।।
माहेश्वर्यायुतं देवं वृषारूढं स्मिताननम्।
शुद्धस्फटिकसंकाशं नमामि रुरुभैरवम्।।

831.क्रोधनभैरव ध्यानम्

त्रिणेत्रं वरदं शान्तं कुमारं च दिगम्बरम्।
गदां शङ्खं च वरदं चक्रं च पानपात्रं च धारिणम्।।
लक्ष्म्या च सहितं वामे गरुडासनसुस्थितम्।
नीलवर्णं महादेवं वन्दे श्रीक्रोधभैरवम्।।

832.उन्मत्तभैरव ध्यानम्

त्रिणेत्रं वरदं शान्तं कुमारं च दिगम्बरम्।
हेमवर्णं महादेवं अश्ववाहनसुस्थितम्।।
खड्गं कपालं मुसलं दधतं खेटकं तथा।
वाराही शक्तिसहितं वन्दे उन्मत्तभैरवम्।।

833.कपालभैरव ध्यानम्

त्रिणेत्रं वरदं शान्तं कुमारं च दिगम्बरम्।
पाशं वज्रं तथा खड्गं पानपात्रं च धारिणम्।।
इन्द्राणी शक्तिसहितं गजवाहनसुस्थितम्।
कपालभैरवं वन्दे पद्मरागप्रभं शुभम्।।

834.भीषणभैरव ध्यानम्

त्रिणेत्रं वरदं शान्तं कुमारं च दिगम्बरम्।
खड्गं शूलं कपालं च धारिणं मुसलं तथा।।
चामुण्डा शक्तिसहितं प्रेतवाहनसुस्थितम्।
रक्तवर्णं महादेवं वन्दे भीषणभैरवम्।।

835.चण्डभैरव ध्यानम्

त्रिणेत्रं वरदं शान्तं कुमारं च दिगम्बरम्।
धनुर्बाणं च बिभ्राणं खड्गं पात्रं तथैव च।।
कौमारी शक्तिसहितं शिखिवाहनसंस्थितम्।
गौरवर्णयुतं देवं वन्दे श्रीचण्डभैरवम्।।

836.संहारभैरव ध्यानम्

दशबाहुं त्रिणेत्रं च सर्पयज्ञोपवीतिनम्।
दंष्ट्राकराळवदनं अष्टैश्वर्यप्रदायगकम्।।
दिगम्बरं कुमारं च सिंहवाहनसंस्थितम्।
शूलं डमरुकं शङ्खं गदां चक्रं च धारिणम्।।
खड्गं पात्रं च खट्वाङ्गं पाशमङ्कुशमेव च।
दैत्यशीर्ष कपालोग्र वहन्मालाधरं वटुम्।।
उग्ररूपं मदोन्मत्तं बाडवानल भैरवम्।
चण्डिकाशक्तिसहितं ध्यायेत् संहारभैरवम्।।

837.आहवनीयाग्नि ध्यानम्

एकास्यं रमणीयदेहमतुलं पादत्रयेनान्वितम्।
मालामङ्कुश तीक्ष्णशूलडमरुं दोर्भिर्धृतं स्रुक्स्रुवौ।।
ज्वालाजालविभूषितं त्रिणयनं पीताम्बराढ्यं विभुम्।
पूर्वे त्वाहवनीयमग्निममलं वेदाश्रकुण्डे भजे।।

838.दक्षिणाग्नि ध्यानम्

तप्तस्वर्णसमप्रभं द्विमुखयुक् पादत्रयेणान्वितम्
दक्षोत्वाद्यचतुष्टयं तदितरे जिह्वासुशेषास्थिताः।
शक्त्यग्निस्रुवाज्यपात्रपरशुः स्रुक् तोमरं मेषगं
बिभ्रद्दक्षिणमग्निमीशमनघं याम्याश्च चापाख्यगम्।।

839.वृद्धाग्नि ध्यानम्

वरदमभयमुद्रां एकवक्त्रं त्रिणेत्रं
सुसितपरशुशूलं वेदहस्तं जटाश्च।
दधतममलरूपं पावके श्वेतवर्णं
त्वधिगतवृषपृष्ठं वृद्धमग्निं भजेऽहम्।।

840.सामान्याग्नि ध्यानम्

अभयवरदखेटं शक्तिमक्षं स्रुवञ्च,
द्विमुखममलरूपं हस्तपद्मैर्दधानम्।
तरुणरविसमाभं त्वीशगाष्टाश्रकुण्डे
ह्यतुलितमुखदन्तं नौमि सामान्यमग्निम्।।

841.यौवनाग्नि ध्यानम्

ज्वालामालो ज्वलन्तं शिवसमवदनं रक्तवर्णं त्रिणेत्रम्
टङ्कं पाशं तथाब्जं परशुवरमथाऽभीतिवज्रं च चक्रम्।
दोर्भिः स्सव्यापसव्यैर्दशतिरविधृतं भुक्तिमुक्तिप्रदं तं
रक्तो दिक्स्थ त्रिकोणे समधिगतवृषं यौवनाग्निं स्तुवोऽहम्।।

842.केवलाग्नि ध्यानम्

नेत्रद्वन्द्वेनयुक्तं वरदमभयदं हस्तयुग्मं वरेण्यं
सर्वालङ्कारशोभं सितवसगधरं फुल्लपद्मासनस्थम्।
ज्वालाजिह्वाभिरामं नमदखिलजनाभीष्टसंवत्प्रदन्तं
ध्यायेऽहं पद्मकुण्डे स्मितमुखममलं सौम्यगे केवलाग्निम्।।

843.गार्हपत्याग्नि ध्यानम्

एकास्यं वेदहस्तं वरदमभयदं स्रुक्स्रुवौ धारयन्तं
रक्ताङ्गं रक्तवस्त्रं समधिगतहयं सप्तजिह्वाज्वलाङ्गम्।
मुक्तामालादिभूष्यं नमदखिलजनानन्दितं सुन्दरं तं
